44 ^{a}) D11 भ्रातर (for मातर) D10 transp पितर and मातर Ś1 Ñ V B1 3 D1-4 6 10 11 [उ]भौ, D8 G2 [अ]पि (for [ए]व) —^{b}) D1 प्रणम्य (for समान्य) Ś1 D2 3 10 [अ]भिप्रगम्य (for °प्रसाद्य) Ñ1 समान्याभिराघव (sic), Ñ2 V B D6 योनुमान्य प्रसाद्य च, G3 परिष्वज्य समाद्य च (sic), M1 2 परित्यज्य प्रसाद्य च —^{c}) D8 T2 G2 Cr अनुप्रव्राजितो, Cv m g as in text (for °व्रजितो) Ś1 D10 नित्य (for राम) —^{e}) Ś1 Ñ V B1 2 4 D1-4 6 10 11 अनुकोशेन, B3 अनुरक्तो हि (for आनुकूल्येन) —^{f}) D1 त्यक्त्वा ग्राम्यसुखं हि तत्, D9 सुत्यक्त्वा सुखमुत्तमं

45 D4 om 45 —^{a}) Ś1 अनुगच्छत (archaic), V2 °गच्छामि (sic), D10 11 अन्वगच्छत (for अनुगच्छति). —^{b}) M2 प्रस्थित (for पालयन्) Ñ2 V B D6 transp भ्रातर and पालयन्

Arya Research Team

पितृवद्वर्तते रामे मातृवन्मां समाचरन् ।
ह्रियमाणां तदा वीरो न तु मां वेद लक्ष्मणः ॥ ४६
वृद्धोपसेवी लक्ष्मीवाञ्शक्तो न बहुभाषिता ।
राजपुत्रः प्रियश्रेष्ठः सदृशः श्वशुरस्य मे ॥ ४७

मत्तः प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः ।
नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान् ॥ ४८
यं दृष्ट्वा राघवो नैव वृद्धमार्यमनुस्मरत् ।
स ममार्थाय कुशलं वक्तव्यो वचनान्मम ।
मृदुर्नित्यं शुचिर्दक्षः प्रियो रामस्य लक्ष्मणः ॥ ४९

G 5 36 65
B 5 38 62
I 5 35 54

46 B_4 om 46 $Ś_1$ Ñ V B_1 $D_{1-4\ 6\ 10\ 11}$ read 46 after 48^{ab} —^{ab}) B_7 सोढ (sic) (for रामे) $Ś_1$ $Ñ_1$ $D_{1-3\ 10\ 11}$ वर्तते मयि, $Ñ_2$ V B_{1-3} D_6 च सदा (B_1 तथा) मयि, $D_{7\ 9}$ G_3 Ct मा समाचरत्, G_1 मा सदाचरन्, Cr m g as in text (for मा समाचरन्) D_4 पित्रवर्धत रामेण मात्रवर्धकृते मयि (sic) —B_3 om 46^{cd} —^{d}) G_1 च (for तु) G_3 देव (metr), M_2 वेत्ति (for वेद) S_1 $Ñ_1$ $D_{1-4\ 10\ 11}$ मा वेत्ति स, $Ñ_2$ V $B_{1\ 2}$ D_6 मां जानाति (for तु मा वेद) —After 46, $Ś_1$ ins 864*, while $Ñ_1$ ins

863* सनिधावपि तदा स्याद्राघवावरजो बली ।
नाराचेन सुतीक्ष्णेन प्राहिणोद्यमसादनम् ।
राक्षसेन्द्र दुरात्मान रावण लोक . । कम् ।
रामानुजो महावीर्य. सुमित्रानन्दवर्धन ।

47 D_4 om 47^{ab} —^{a}) $Ñ_2$ V B D_6 ह्री (B_3 श्री)-माश्च (for लक्ष्मीवान्) —^{b}) M_1 शालो (for शक्तो) D_8 बहुभाषितु $Ś_1$ $Ñ_1$ $D_{1-3\ 10\ 11}$ शक्तश्च ($Ñ_1$ मुक्तश्च, D_3 श्लक्ष्ण च, D_{11} शूरश्च) बहुजल्पक, $Ñ_2$ V B D_6 शूरो न बहुजल्पिता (B_4 °त) —After 47^{ab}, B_3 reads 35 (om ^{ef}) and 41^{c}–42 —$Ś_1$ om 47^{cd} —^{c}) V_2 B_2 $D_{3\ 5\ 7-9}$ $T_{1\ 2}$ Ct राजपुत्र- Ñ V B_{1-3} $D_{1-4\ 6\ 10\ 11}$ प्रियो राज्ञ, B_4 प्रिय प्राज्ञ, D_5 G_2 M_3 प्रिय श्रेष्ठ, Ct as in text (for प्रियश्रेष्ठ) —^{d}) D_{10} सदृग्देवाधिपस्य च

48 ^{a}) $Ś_1$ V_1 D_{10} मातु, V_2 सत (sic), B_3 T_3 M_3 मम, Ct as in text (for मत्त) —^{b}) $Ś_1$ D_{10} सगी, Ñ V B D_6 मन्ये, D_1 मम, $D_{2-4\ 11}$ अग (for भ्राता) —After 48^{ab}, $Ś_1$ Ñ V B_1 $D_{1-4\ 6\ 10\ 11}$ read 46 —$Ś_1$ B_4 om 48^{c}–49^{b} —^{c}) Ñ V B_{1-3} $D_{1-4\ 6\ 10\ 11}$ यु (D_{10} यो)ज्यते, D_5 नियुज्य, T_3 M_2 नियुजेद् (for नियुक्तो) $Ñ_2$ V B_{1-3} D_6 हि (for तु) —^{d}) $Ñ_1$ वै वहति (for उद्वहति) $Ñ_1$ $D_{1-4\ 10\ 11}$ धुर्यवत् (for वीर्यवान्) $Ñ_2$ V_1 B_{1-3} D_6 स तामुद्वहते धुर, V_2 महतामुद्वहते भुव (hypm)

49 $Ś_1$ B_4 om 49^{ab} (cf v l 48) $Γ_1$ damaged for 49^{abcd} —^{a}) Ñ V $B_{1\ 2}$ $D_{1\ 2\ 10\ 11}$ रामस्नेहाद्वसन्ने ($Ñ_2$ °स्नेह- [illeg])न (D 1 2 10 11 °च), B_3 D_6 रामस्नेहानुबधेन, D_3 रामप्रियो हसन्नेव, D_4 रामप्रियो ह्यसौ नित्य —^{b}) Ñ V B_{1-3} $D_{1-9\ 11}$ T_2 M_3 Cr t वृत्तम् (for वृद्धम्) D_{10} वृत्तमानम् (sic) (for वृद्धमार्यम्) $Ñ_2$ V B_{1-3} $D_{1-4\ 6\ 7-11}$ G_2 अनुस्मरन्, $D_{5\ 6}$ $T_{2\ 3}$ $G_{1\ 2}$ $M_{1\ 2}$ Cr m g °स्मरेत्, Ct as in text (for °स्मरत्) —After 49^{ab}, Ñ V_2 $D_{1-4\ 6\ 10\ 11}$ ins, while $Ś_1$ ins after 46

864* सासुरा सहगन्धर्वा भुजगनरदेवता ।
हन्यात्स समरे क्रुद्ध कि पुना रावण रणे ।

[(1 1) $D_{6\ 11}$ ससुरा V_2 असुरासर-, D_{2-4} ससुरासुर- (for सासुरा सह-) $D_{2\ 11}$ -गधर्व्, D_3 गधर्वान् (for -गन्धर्वा) V_2 -चन- (for नर-) D_3 सयक्षोरगराक्षसान् (for the post half) —(1 2) $Ś_1$ D_{10} निहन्यात्, $Ñ_1$ D_{11} स हन्यात (by transp), D_3 हन्याच]

—$Ś_1$ Ñ V B_{1-3} $D_{1-4\ 6\ 10\ 11}$ transp ^{cd} and ^{ef} (including star passages) —^{cd}) D_4 स मद्वाक्य सकुशलो (for °) D_1 बहुशस्त्वया, D_4 लक्ष्मणस्त्वया (for वचनान्मम) $Ś_1$ D_{10} मद्वाक्यात्कुशल वाच्यस्त्वया वानरपुगव, Ñ V B $D_{2\ 3\ 6\ 11}$ स च ($Ñ_1$ $D_{2\ 11}$ ते) मद्वचनाद्वाक्य कुशल बलवत्तर (D_3 हनुमस्त्वया) ❀ Ck ममार्थाय मत्प्रयोजनो न्मुख्याय मम वचनाद्वक्तव्य इति ❀ —After 49^{cd}, $Ñ_1$ (slightly illeg) ins

865* बहुमत्तामिवाशी । । लाभि पुन पुन ।
अभिनन्द्य महाबाहुर्लक्ष्मण शुभलक्षण ।

—$Ñ_1$ cont, while $Ś_1$ (1 3 only) $Ñ_2$ V B $D_{1-4\ 6\ 10\ 11}$ ins after 49^{cd}.

866* अप्रमत्तेन काकुत्स्थे भवितव्य त्वयेति च ।
उत्थायोत्थाय वक्तव्यो सौमित्रिर्वचनान्मम ।
कुशल लक्ष्मण पृष्ट्वा सुग्रीव च महाबलम् ।

[(1 1) D_4 अप्रसक्तेन $Ñ_1$ त्वया सदा (for त्वयेति च) —(1 2) D_4 लक्ष्मणो (for सौमित्रिर्) $Ñ_1$ $D_{1-3\ 10\ 11}$ वचन ल ($Ñ_1$ D_3 °नाह्न)क्ष्मणो मम (for the post half) —(1 3) D_{11} transp कुशल and लक्ष्मण]

—B_4 om 49^{ef} —^{e}) $Ś_1$ Ñ V B_{1-3} $D_{1-4\ 6\ 10\ 11}$ द्रात (for नित्य) —^{f}) $Ñ_1$ लक्ष्मणो राघवप्रिय —After 49, $D_{5\ 7-9}$ S ins

867* यथा हि वानरश्रेष्ठ दु खक्षयकरो भवेत् ।
त्वमस्मिन्कार्यनिर्वाहे प्रमाणं हरिसत्तम ।
राघवस्त्वत्समारम्भान्मयि यत्नपरो भवेत् ।

[(1 1) D_8 [इ]ह (for हि) —(1 2) $D_{5\ 8}$ T_1 G $M_{2\ 3}$ -निर्योगे (for -निर्वाहे) D_{7-9} हरियूथप]

G 5 36 69
B 5 38 61
L 5 35 56

इदं ब्रूयाश्च मे नाथं शरं रामं पुनः पुनः ।
जीवितं धारयिष्यामि मासं दशरथात्मज ।
ऊर्ध्वं मासान्न जीवेयं सत्येनाहं ब्रवीमि ते ॥ ५०
रावणेनोपरुद्धां मां निकृत्या पापकर्मणा ।
त्रातुमर्हसि वीर त्वं पातालादिव कौशिकीम् ॥ ५१

ततो वस्त्रगतं मुक्त्वा दिव्यं चूडामणिं शुभम् ।
प्रदेयो राघवायेति सीता हनुमते ददौ ॥ ५२
प्रतिगृह्य ततो वीरो मणिरत्नमनुत्तमम् ।
अङ्गुल्या योजयामास न ह्यस्य प्राभवद्भुजः ॥ ५३
मणिरत्नं कपिवरः प्रतिगृह्याभिवाद्य च ।
सीतां प्रदक्षिणं कृत्वा प्रणतः पार्श्वतः स्थितः ॥ ५४

---

50 [a]) V2 इम, D3 एव (for इद) Ś1 D2 10 11 तु (for च) Ñ2 V B D6 वाक्य (for नाथ) Ñ1 मन्नाथ त्वमिद ब्रूया, D4 त मे नाथमिद ब्रूया —[b]) Ñ1 नाथ (for राम) V1 B2 transp शर and राम —[c]) Ñ1 धारयाम्येव —[d]) Ś1 D10 यावन्मासो गमि(D10 भवि)ष्यति, D3 द्वा मासं रघुनदन —[e]) Ś1 ऊर्ध्वं मास, Ñ2 V B D6 मासादूर्ध्वं (by transp) —[f]) Ś1 Ñ V B1-3 D2 6 10 11 सत्यमेतद्, B4 सत्यमेव (for सत्येनाह) B4 [अ]ह (for ते) D1 3 4 सत्य प्रतिश्रणोमि ते —After 50, Ś1 ins 868*

51 Ś1 om 51 —[a]) Ñ V B1 2 D1-4 6 10 11 [उ]-पसृष्टा, B4 °पृष्टा (for °रुद्धा) B3 [उ]पकृष्टा ता —[b]) D2 निकृता (for निकृत्या) Ñ1 D1 2 10 11 प्राकृतामिव, Ñ2 V B D6 प्राकृता यथा(B1 मया [sic]), D4 प्राज्ञतामिव (for पापकर्मणा) D3 निर्जनामिव प्राकृता —[c]) G2 अर्हसि Ñ1 D3 4 10 मज्जन्तीं, Ñ2 V1 B D1 2 6 11 नश्यन्तीं, V2 लप्स्यती, G2 मा वीर (for वीर त्व) —[d]) Ñ V B D6 पृथिवीमिव(B3 °मपि) वास(Ñ2 B3 D6 राघ)व, D1 2 4 11 पाताल इव राघव (sic), D3 केशवो वसुधामिव, D10 वराह इव मेदिनीं —After 51, Ñ V B D1-3 6 10 11 ins, while Ś1 ins after 50 (owing to om)

868* सीताया वचन श्रुत्वा हनुमानिदमब्रवीत् ।
सर्वं करिष्यते रामो यथोक्तं मिथिलि त्वया ।
यत्तु रामोऽभिजानीयादभिज्ञानमनिन्दिते ।
प्रीतिसजनन तस्य तत्प्रदातु त्वमर्हसि ।
सा निरीक्ष्य तत सर्वं वेण्या ग्रथितमुत्तमम् । [5]

[(1 1) Ś1 Ñ1 D10 तु वच, D1-3 11 तद्वच (for वचन) —(1 2) B2 यदुक्त Ś1 D10 यत्त्वमिच्छसि मैथिलि, Ñ1 D1-3 11 यावदिच्छसि(D2 11 °ति) मैथिलि (for the post half) —For 1 3-4, cf v l 5 38 17 —(1 3) V1 B2 येन, D3 युक्त(sic) (for यत्तु) B2 D3 विजानीयाद(D3 °ते), D11 [स]मिजानीते —(1 4) Ś1 Ñ1 D2 10 11 इह (for त्वम्) B3 प्रत्यय दातुमर्हसि, D1 प्रदातु त ममार्हसि, D3 दातुमर्हसि मथिलि (for the post half). —After 1 4, Ñ1 ins

868(A)* तथा तथा वदिष्येऽहं भाषमे त्व यथा यथा ।
देवेहि कारयिष्येऽहं सर्वं व भाषित तव ।
ता सीता बाष्पमुख हनूमन्त महाबलम् ।

—(1 5) Ñ1 निरीक्ष्य मा (by transp), D3 मा निशम्य Ñ2 D6 तदा (for तत) D2 सीता (for सर्वं) Ś1 Ñ1 V2 D1-3 10 वेणी, D11 वेण्युद- (for वेण्या)]

52 [a]) D4 वेणी (for वस्त्र-) Ś1 Ñ1 D1-3 10 11 वेणीं मुक्त्वा ददौ तस्मै, Ñ2 V B D6 विमुच्य प्रददौ तस्मै —[b]) D5 G1 दिव्य (for दिव्य) D8 शुचिं (for शुभम्) Ñ V B D1 2 6 11 मणिरत्न हनूमते —[c]) Ñ1 B3 D2 11 G2 3 प्रदेय, Ñ2 V B2 D6 देयोय, B4 देय च (for प्रदेयो) —[d]) D1 मा त (for सीता) D3 तदा (for ददौ) Ś1 Ñ V B D2 6 10 11 सीता सुरसुतोपमा

53 Ñ2 V B D6 om 53 —[a]) D3 तु त (for ततो) —[b]) Ś1 Ñ1 D1-4 10 11 मणिं वेणीशयं शुभ —[c]) D1-5 G1 3 M1 2 अंगुल्या, Cv r m g k t as in text (for अङ्गुल्या) —[d]) Ś1 प्राभुयाद्, Ñ1 G3 प्रभवद्, D3 प्रविशद् (for प्राभवद्) Ś1 D1-4 10 11 भुजे (for भुज)

54 [a]) Ñ2 V B D3 6 हरिवर (for कपिवर) —[b]) Ś1 Ñ1 D3 4 10 सम्प्रगृह्य, D1 2 11 स सगृह्य (for प्रतिगृह्य) B2 [अ]भिवद्य, B3 [अ]भिनद्य. —After 54[ab], Ś1 Ñ1 D1-4 10 11 ins

869* आचार्यमिव शिष्यो हि विनीतवदुपस्थित ।

[D11 इति (for इव) D3 उपस्थित Ñ1 D2 11 चिन्त इदम् अब्रवीत् (for the post half)]

—Thereafter D1 3 cont

870* दत्त्वा तु त मणि सीता इद प्राह शुचिस्मिता ।
अनेन ते हरिश्रेष्ठ मणिरत्नेन राघव ।
उपनीतेन दृष्टाहमिति नून स मन्यते ।
त गृहीत्वा मणिवर हनुमान्प्लवगर्षभ ।

[(1 1) Note hiatus between the two halves D1 सुनिर्मिता (for शुचि°)]

—[c]) B2 D3 4 G2 प्रदक्षिणीकृत्य —[d]) Ñ2 V B D1 6 प्राजलि (for प्रणत) Ś1 Ñ1 D1-3 10 11 पार्श्वत प्राजलि स्थित —After 54, Ñ2 V B D6 ins, while Ñ1 D2 11 cont after 869*

871* आपृच्छे त्वा विशालाक्षि नोत्कण्ठा कर्तुमर्हसि ।

[Ñ1 D2 11 आपृच्छामि हि ते(D2 त्वा) देवि (for the prior half) Ñ1 illeg for नोत्कण्ठा]

—Ñ1(partly illeg) further cont ·

Arya Research Team

हर्षेण महता युक्तः सीतादर्शनजेन सः।
हृदयेन गतो रामं शरीरेण तु विष्ठितः ॥ ५५

मणिवरमुपगृह्य तं महार्हं
जनकनृपात्मजया धृतं प्रभावात्।
गिरिवरपवनावधूतमुक्तः
सुखितमनाः प्रतिमंक्रमं प्रपेदे ॥ ५६

G 5 36 77
B 5 38 70
L 5 35 66

इति श्रीरामायणे सुन्दरकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

Arya Research Team

872* आगमिष्यति ते भर्ता [illegible]।
[illegible] राम पश्य सलक्ष्मणम्।
इति सधा। बहुधा समाश्वस्य च जानकीम्।

55 B1 om 55 —a) Ś1 Ñ1 D1-4 10 11 [आ]विष्ट (for युक्त) —b) B3 M2 सदर्शनेन (for -दर्शनजेन) B4 D3 च (for स) Ñ2 V2 D6 सीताया दर्शनेन स (D6 च) —d) Ñ2 V1 M2 च (for तु) Ś1 B4 D10 11 ह्यधिष्ठित, Ñ1 T3 [अ]त्र धि(T3 नि)ष्ठित, B3 [अ]प्यधिष्ठित, D1 4 6 च(D1 तु) धिष्ठित, D2 तु तिष्ठति, D3 तु चेष्टित (for तु विष्ठित) D7 9 लक्ष्मण च सलक्षण —After 55, B3 ins

873* श्रुत्वा तद्वचन सीता हर्षसपूर्णमानसा।

56 V1 reads 56 and colophon in marg —a) B3 M3 मणिरत्नम्, D11 °प्रवरम् (hypm) (for °वरम्) G3 उपगम्य (for °गृह्य) Ś1 B2 D10 वराहँ, B3 महात, G3 महा मा (for महार्हं) —b) Ś1 [अ]र्पितं, D3 [आ]हृत, 12 (also) वृत (for धृत) D1 2 11 प्रयत्नात्, D3 om (for प्रभावात्) D5 8 धृतप्रभाव —c) N2 V B D6 द्रुम (B4 °त) द्रव, D1-4 11 T3 G M2 3 गिरिरिव (D4 °र्) (for गिरिवर-) Ś1 Ñ V B D1 2 4 6 10 11 मूर्ति, D3 मूर्धा (for मुक्त) —d) D8 परिसक्रम (for प्रति°) G2 प्रतस्थे, G3 [illegible]दे (for प्रपेदे) Ś1 Ñ D1-4 10 हृषि(Ñ2 क्षुभि)ततनुर्हनुमॉस्तदा बभूव(Ś1 D10 °मान्बभूव सद्य), V B D6 क्षुभिततनुर्हनुमान्कृतस्तदानीं, D11 हृषितमना स तदा बभूव वीर

Colophon V1 reads colophon in marg (cf v l 56) —*Sarga name* Ś1 Ñ V1 B1 3 D6 10 मणिप्रदान, V2 D3 सीता मणिप्रदान(D3 °न), B2 4 चूडामणिप्रदान, D1 2 11 मणिप्रदानिक, D4 हनुमतो मणिप्रदान —*Sarga no* (figures, words or both) Ñ1 B3 4 D1 2 4 10 11 om, Ś1 D5 7-9 T G M1 3 38, V1 M2 37, V2 27, D3 40 —After colophon, G concludes with श्रीरामाय नम

३७

G. 5 00 0
B 5 39 1
L 5 36 1

मणि दत्त्वा ततः सीता हनूमन्तमथाब्रवीत् ।
अभिज्ञानमभिज्ञातमेतद्रामस्य तत्त्वतः ॥ १
मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यति ।
वीरो जनन्या मम च राज्ञो दशरथस्य च ॥ २
स भूयस्त्वं समुत्साहे चोदितो हरिसत्तम ।
अस्मिन्कार्यसमारम्भे प्रचिन्तय यदुत्तरम् ॥ ३
त्वमस्मिन्कार्यनिर्योगे प्रमाणं हरिसत्तम ।
तस्य चिन्तय यो यत्नो दुःखक्षयकरो भवेत् ॥ ४
स तथेति प्रतिज्ञाय मारुतिर्भीमविक्रमः ।
शिरसावन्द्य वैदेहीं गमनायोपचक्रमे ॥ ५
ज्ञात्वा संप्रस्थितं देवी वानरं मारुतात्मजम् ।
वाष्पगद्गदया वाचा मैथिली वाक्यमब्रवीत् ॥ ६
कुशलं हनुमन्ब्रूयाः सहितौ रामलक्ष्मणौ ।
सुग्रीवं च महामात्यं वृद्धान्सर्वांश्च वानरान् ॥ ७
यथा च स महाबाहुर्मां तारयति राघवः ।
अस्माद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥ ८
जीवन्तीं मां यथा रामः संभावयति कीर्तिमान् ।
तत्त्वया हनुमन्वाच्यं वाचा धर्ममवाप्नुहि ॥ ९

37

☞ Ñ2 V B D6 om Sarga 37 M2 begins with श्रीरामाय नम

1 [a]) D11 तदा (for तत) —[b]) Ś1 Ñ1 D1 2 4 10 11 वानर वाक्यमब्रवीत् —[c]) D4 प्रतिज्ञानम्, D5 (marg gloss ज्ञातमेव) (for अभिज्ञातम्) Ś1 Ñ1 D2 3 10 अनु (D2 3 °भि)ज्ञातमभिज्ञानम् —[d]) I1 1 इद (for एतद्) D3 8 G2 धीमत (for तत्त्वत)

2 [a]) D6 द्रत्वा (sic) (for दृष्ट्वा) D7-9 T1 2 transp तु and दृष्ट्वा Ś1 Ñ1 D1-4 10 11 M1 मणि तु(D3 च) रामो (D2 स तु) दृष्ट्वैव(M1 वै दृष्ट्वा) —[b]) D10 म (for म-) —[c]) D3 मम चैव जनन्याश्च

3 [a]) G2 त्वत्- (for त्व) I1 G2 3 M2 Ct समुत्साह- (M2 °हश्), Ck as in text (for °त्साहे) Ś1 D10 मम यश्च महोत्साहो, Ñ1 मया भूय समुत्साहो, D1 2 स भूय स्वयमुत्साहाच्, D3 स भूयस्तु समुत्साहो, D4 स भूयश्च समुत्साहात्, D11 स भूय महसोत्साह- —[b]) Ś1 Ñ1 देशितो, D7 नोदितो, D11 -सादितो (for चोदितो) Ñ1 हरिपुगव , D2 5 11 °सत्तम , D4 वानरर्षभ (for हरिसत्तम) —[c]) D3 यस्मिन (for अस्मिन) D5 8 कार्य (for कार्थ-) D7 9 Ck t -समुत्साहे (for समारम्भे) —[d]) G2 विचितय G1 3 तद् (for यद्) Ś1 Ñ1 D1-4 10 11 चि(Ś1 प्रचि[hypm])-तयेदुत्तरोत्तर

4 T2 om 4[ab] —[a]) D2 अस्य (for अस्मिन्) Ś1 D10 -मयोगे (for -निर्योगे) —[b]) M2 कपि- (for हरि-) Ś1 Ñ1 D1 2 4 10 1 यूथप, D3 -पुगव (for -सत्तम). —D1 om 4[c-5] —[c]) D5 8 T2 3 M1 3 Cg चिनयतो, Cr t as in text (for °य यो) Ś1 Ñ1 D3 तत्तचिनय यद्यन्मे, D1 11 तत्तद्विचिंतयेर्यत्ताद्(D11 °न्मे), D2 तत्र चिनय यद्यत्ताद् —[d]) Ś1 Ñ1 D1-3 10 11 क्षयकर (for °करो) D1 मम (for भवेत). —After 4, D7-9 T2 (before 4[cd]) G M1 ins , while T1 3 M3 ins after 4[ab]

874* हनूमन्यत्नमास्थाय दुःखक्षयकरो भव ।

5 D4 om 5 (cf v l 4). —[a]) Ś1 तत् (for म) Ñ1 प्रतिश्रुत्य, D5 तदा° (for प्रतिज्ञाय) —[c]) ✗ Cg आवन्येति पदच्छेद ✗

6 [a]) D4 तत (for ज्ञा त्वा) D1 तु (for म-) D11 -स्थिते (for स्थित) Ś1 D10 वीर (for देवी) —[b]) D7 T1 3 G2 पवनात्मज, D9 वानरा° (for मारुता°). —[c]) Ś1 Ñ1 D1 2 4 10 11 -पीडितया, D3 -मरुद्वया (for -गद्गदया) —[d]) D1 वानर (for मैथिली)

7 [a]) Ś1 Ñ1 D1 2 4 10 11 कौशल्य (for कुशल) D3 7 9 हनुमन्कुशल (by transp). D1 8 ब्रूयात् , D2 ब्रूहि, D4 पृष्ट (sic) (for ब्रूया) —[b]) Ś1 D10 सह तौ (for सहितौ) —[c]) Ś1 D10 च महा°मात, Ñ1 D3 11 च(D11 स) महामात्य (for च महामात्य) —[d]) D1 चान्याश् (for सर्वांश्) D5 7 9 transp वृद्धान् and सर्वांश् D3 अन्याश्च हरियूथपान् —After 7, D5 7-9 S ins

875* ब्रूयास्त्वं वानरश्रेष्ठ कुशलं धर्मसंहितम् ।

8 = 5 38 22 Ś1 Ñ1 D2 4 10 11 om 8 D1 3 transp 8 and 9 —[a]) D7 तथा (for यथा) D1 सु- (for स) M3 स च (by transp) —[c]) D1 3 च दुःख (for दुःखाम्बु) —[d]) D1 तत्समाधर्तुमर्हसि

9 D1 3 transp 8 and 9 —[a]) D9 मा (for मां) —[b]) G1 मतारयति, Cg as in text (for समावयति) Ś1 D10 वीर्यवान (for कीर्तिमान) — After 9[ab], N1 ins

876* वीर्यवाञ्शीलसम्पन्नो लक्ष्मणश्च महाबल ।

—[c]) Ś1 T3 स त्वया, Ñ1 त्वया च, D5 M3 Cg तत्तथा (for तत्त्वया) Ś1 D3 वाच्यो, Ñ1 वाच्यो (for वाच्य) D1 4 10 तथा स(D1 स त्वया) हनुमन्वाच्यो, D2 11 तत्त्वया(D11

Arya Research Team

नित्यमुत्साहयुक्ताश्च वाचः श्रुत्वा मयेरिताः ।
वर्धिष्यते दाशरथेः पौरुषं मदवाप्तये ॥ १०
मत्संदेशयुता वाचस्त्वत्तः श्रुत्वैव राघवः ।
पराक्रमविधिं वीरो विधिवत्संविधास्यति ॥ ११
सीतायास्तद्वचः श्रुत्वा हनुमान्मारुतात्मजः ।
शिरस्यञ्जलिमाधाय वाक्यमुत्तरमब्रवीत् ॥ १२
क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः ।
यस्ते युधि विजित्यारीञ्शोकं व्यपनयिष्यति ॥ १३
न हि पश्यामि मर्त्येषु नामरेष्वसुरेषु वा ।
यस्तस्य वमतो बाणान्स्थातुमुत्सहतेऽग्रतः ॥ १४
अप्यर्कमपि पर्जन्यमपि वैवस्वतं यमम् ।
स हि सोढुं रणे शक्तस्तव हेतोर्विशेषतः ॥ १५
स हि सागरपर्यन्तां महीं शासितुमीहते ।
त्वन्निमित्तो हि रामस्य जयो जनकनन्दिनि ॥ १६
तस्य तद्वचनं श्रुत्वा सम्यक्सत्यं सुभाषितम् ।
जानकी बहु मेनेऽथ वचनं चेदमब्रवीत् ॥ १७
ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः ।
भर्तुः स्नेहान्वितं वाक्यं सौहार्दादनुमानयत् ॥ १८

G 5 0 0
B. 5. 39 19
L 5 36 17

त्वया स) हनुमन्वाच्यो, D_3 तथा त्वया स वक्तव्यो ❀ Cg तत्तथा अव्ययमेतत् ❀ —^{d}) D_4 समाप्नुहि (for अवा°) $\tilde{N}_1$ श्रेष्ठौ नरवरात्मजौ —After 9, $\tilde{N}_1$ ins (partly illeg)

877* ,+++**** वानराणा शो वच ।
ततो भवान्हरिश्रेष्ठ धर्ममाप्नोत्वनुत्तमम् ।

10 ^{a}) $Ś_1$ D_{10} युक्त स, $\tilde{N}_1$ $D_{1\,2\,4\,7\,9\,11}$ -युक्तस्य, D_3 सयुक्ता (for युक्ताश्च) —D_8 reads 10^b in marg —^{b}) $Ś_1$ D_{10} वाक्य, $\tilde{N}_1$ $D_{2-4\,11}$ वाच (for वाचं) D_2 $G_{2\,3}$ M_3 त्वया (for मया) $Ś_1$ $\tilde{N}_1$ $D_{2-4\,10\,11}$ [ई]रिता ($Ś_1$ D_{10} °त) (for [ई]रिता) D_1 वाचं स्मृत्वा मयेरिता —^{c}) $Ś_1$ D_{10} विवि(D_{10} त्सर्वि)ज्यते दाशरथि

11 ^{a}) T G_3 M_2 -युता, Cm t as in text (for -युक्ता) T G_3 M_2 वाच (for वाचस्) $Ś_1$ $D_{3\,4\,10}$ स हि मे त्व (D_{10} त)त्समायुक्त(D_3 °क्ता, D_4 °क्ता), $\tilde{N}_1$ इद मे म समादाय, D_1 पौरुष तत्समाधाय, D_2 इह मे त्वत्समायुक्तो, D_{11} इदमेतत्समाधाय —^{b}) $D_{1\,7\,9\,11}$ वाच (for त्वत्त) $Ś_1$ $\tilde{N}_1$ D_{10} वच श्रुत्वा च (for त्वत्त श्रुत्वैव) —^{c}) T_2 G_2 रामो (for वीरो) D_{7-9} पराक्रमे मति वीरो —^{d}) D_{11} सम्प्रधास्यति (for सवि°)

12 ^{a}) D_8 T_2 $M_{1\,3}$ वचन (for तद्वच) G_1 तस्यास्तद्वचन श्रुत्वा —^{b}) $\tilde{N}_1$ illeg, $D_{2-4\,11}$ पवनात्मज (for मारुता°) —^{c}) T_3 शिरसा (for शिरसि) $Ś_1$ $D_{4\,5\,10}$ T_2 आदाय (for आधाय)

13 ^{b}) $D_{2-3\,8-11}$ G_3 M_1 हर्यक्ष(D_2 °क्षै) (for हर्यृक्ष), D_5 युत, M_3 कृत (sic) (for वृत) $\tilde{N}_1$ -प्रवरास्थित, T_2 प्लवंगर्युत (for प्रवरैर्वृत) —^{c}) D_3 ततो, D_1 यस्तु, D_{11} यस्मै (for यस्ते) M_1 देवि (for युधि) $Ś_1$ $D_{1\,2\,4\,10}$ T [अ]रिं (for [अ]रीन्) D_{11} विनिर्जित्य (for विजित्यारीन्) —^{d}) D_{11} व्यपनुदिष्यति (for व्यपनयिष्यति) $Ś_1$ $\tilde{N}_1$ $D_{3\,10}$ शोक च(D_3 ते) व्यपनेष्यति ❀ Cr व्यपनयिष्यति व्यपनेष्यति ❀

14 $Ś_1$ om 14 —$^{a\,b}$) D_{10} त (for हि) D_3 राक्षसेषु (for नामरेषु) D_{10} [अ]पि, G_1 $M_{1\,2}$ च (for वा) D_2 सुरेष्वप्यसुरेषु च, $D_{4\,8\,11}$ G_2 नासुरेष्वमरेषु वा(D_4 च), $D_{5\,7\,9}$ T_2 M_3 नासुरे(T_2 दानवे)षु सुरेषु वा (for ^{b}) $\tilde{N}_1$ तत्र पश्यामि लोकेस्मिन्नसुरेषु सुरेषु वा —^{c}) D_3 क्षपतो, D_8 $T_{1\,3}$ $G_{1\,2}$ M क्षिपतो, Ck t as in text (for वमतो) $D_{1\,2\,4\,10\,11}$ यस्तस्योद्गम(D_{10} °ह)तो बाणान्.

15 ^{a}) $Ś_1$ D_{10} अथ (for first अपि) —^{b}) M_2 मम (for यमम्) —^{c}) $Ś_1$ $\tilde{N}_1$ $D_{1\,2\,4\,10\,11}$ विमोढु, G_1 हि मोढा (for हि सोढु) D_3 नाश्रयेद्युधि सक्रुद्धस्

16 $Ś_1$ om 16 —^{a}) $\tilde{N}_1$ $D_{3\,4\,10\,11}$ न स, D_1 य स, D_2 न च, M_1 स तु, M_3 न हि, Cg as in text (for स हि) —^{b}) $D_{7\,9}$ G_3 Ck t साधितुम् (for शासितुम्) $D_{1\,2\,7\,9-11}$ Ct अर्हति, Ck as in text (for ईहते) —^{c}) $\tilde{N}_1$ $D_{1\,2\,4\,10\,11}$ -निमित्त, Ck t as in text (for -निमित्तो)

17 ^{a}) $Ś_1$ D_{10} सम्यक् (for श्रुत्वा) —^{b}) $D_{1\,2}$ साध्व, D_{11} साधु (for सत्यं) $Ś_1$ D_{10} सा श्रुत्वा हि सुभाषित, $\tilde{N}_1$ $D_{3\,4}$ सम्यक्साध्व प्र(D_3 °क्साध्वेन, D_4 °क्साधु प्र)भाषित —^{c}) $Ś_1$ $\tilde{N}_1$ -मन्येव, $D_{1\,2\,4\,10}$ म(D_{10} -मा)न्येव, D_5 -मान्याथ, D_{7-9} T_2 मेने त, D_{11} मर्त्वेव (for मेनेऽथ) D_3 बहुभाषोक्तम्. —^{d}) $Ś_1$ $\tilde{N}_1$ $D_{1\,2\,10\,11}$ मैथिली ($Ś_1$ D_{10} वानर) वाक्यमब्रवीत्, $D_{3\,4}$ T_2 इदं(D_4 ततो) वचनमब्रवीत्

18 $Ś_1$ om 18 —^{a}) D_4 हरि (for ततस्) $\tilde{N}_1$ $G_{1\,2}$ स- (for त) D_3 तत सम्प्रस्थित सीता —^{b}) $D_{1-5\,7\,9\,11}$ वीक्ष्यमाणा, D_{10} वक्ष्यमाण (for वीक्षमाणा) —^{c}) $D_{2-4\,7-9\,11}$ $T_{1\,3}$ M_3 Cr g t भर्तृ, Cv m k as in text (for भर्तुः) G_1 स्नेहाद्विद (for स्नेहान्वित) $D_{2\,11}$ भर्तुं, D_4 मार्त्वी (for वाक्य) D_1 भर्तृस्नेहाद्विवक्त त (sic) —^{d}) D_9 G_2 M_1 अन्वमानयत् (for अनु°) $D_{1\,2\,11}$ सौहृदादन्वमानयत्, $D_{3\,10}$ साहार्दादिदमब्रवीत्, G_1 सौहाद दवदत्तदा ❀ Cv r m अनुमानयत्(Cv अनुमानयन्ती) न्मानयन्ती (Cv आर्यत्याह्वित्व्यत्यय ।, so also Cr), Cg अनुमानयदन्वमानयत्।, Ck t अनुमानयदभूजयत् ❀

G 5 00 0
B 5 39 20
L 5 36 18

यदि वा मन्यसे वीर वसैकाहमरिंदम ।
कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ १९
मम चेदल्पभाग्यायाः सांनिध्यात्तव वीर्यवान् ।
अस्य शोकस्य महतो मुहूर्तं मोक्षणं भवेत् ॥ २०
गते हि हरिशार्दूल पुनरागमनाय तु ।
प्राणानामपि संदेहो मम स्यान्नात्र संशयः ॥ २१
तवादर्शनजः शोको भूयो मां परितापयेत् ।
दुःखाद्दुःखपरामृष्टां दीपयन्निव वानर ॥ २२
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः ।
सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वर ॥ २३

कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम् ।
तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ २४
त्रयाणामेव भूतानां सागरस्येह लङ्घने ।
शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ २५
तदस्मिन्कार्यनिर्योगे वीरैवं दुरतिक्रमे ।
किं पश्यसि समाधानं त्वं हि कार्यविदां वरः ॥ २६
काममस्य त्वमेवैकः कार्यस्य परिसाधने ।
पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ २७
बलैः समग्रैर्यदि मां रावणं जित्य संयुगे ।
विजयी स्वपुरं यायात्तत्तु मे स्याद्यशस्करम् ॥ २८

---

19 [a]) D1 3 त्व, T2 मा (for वा) Ś1 D10 तावद्, Ñ1 D1 2 4 11 तात (for वीर) —[c]) D11 G3 कस्मिंश्च —[d]) D2 गमिष्यति

20 [a]) Ś1 Ñ1 D1–3 7 9–11 T1 2 G1 चेत्त, D4 8 वापि (for चेद्) D4 भागाया (for -भाग्यायाः) —[b]) D3 T1 3 सानिध्य(D1 °ध्ये) (for °ध्यात्) Ś1 D10 धीमत , D5 7–9 T2 (also) G1 M3 वानर (for वीर्यवान्) D1 सानिध्ये भव वीर्यवान् , D11 सानिध्याद्वीर्यवास्तव —For 20[c-d], Ś1 Ñ1 D1–4 10 11 subst.

878* शोकस्यास्य विपारस्य मुहूर्तं स्यादपि क्षय ।

[D2 11 [अ]स्य (for [अ]स्य) Ñ1 विशालस्य, D4 विनाशश्च, D10 स्वपारस्य (for विपारस्य) D3 अपारस्यास्य शोकस्य (for the prior half) D1 3 यदि (for अपि) D4 क्षण (for क्षय)] —Thereafter Ñ1 cont (partly illeg)

879* पश्यामि त्वा यावदह तावत्तौ रामलक्ष्मणौ ।
सुग्रीव च महात्मान [illegible] ।

21 Ś1 D10 om 21–22 —[a]) Ñ1 D7 9 T1 Ct ततो, Ck as in text (for गते) D5 [ऽ]पि, M1 Ck तु (for हि) Ñ1 कपि (for हरि-) G हरिशार्दूले —[b]) T3 च (for तु) D1 पुनरापत्राय अपि (sic), D2 3 पुनरावृत्तये(D3 °गामिनि) त्वयि, D4 पुनरामाल्ये त्वयि (sic), D11 पुनरप्यागमे त्वयि —[d]) D3 नास्ति (for स्यान्न) D2 4 11 [अ]स्ति (for [अ]त्र)

22 Ś1 D10 om 22 (cf v l 21) —[a]) Ñ1 D1–4 11 तत्र चा(D4 स, D11 त्र)दर्शन चापि(D3 वीर) —[b]) G1 प्रति (for परि) D1 तापयिष्यति (for परितापयेत) —[c-d]) D2 4 दुःखे (for दुःखाद्) D3 (marg) T1 दुःख, Cr m g k t as in text (for दुःख) Ñ1 D3 4 पराभूता, D2 -परा भूत्वा (for परामृष्टा) M2 इह (for इव) Ñ1 D2 4 दुर्मनस्कामभागिनीं(D2 °स्का विभागिनि), D1 अनाथा दुःख-भागिनीं (for [d]) D1 11 दुःखे दुःखतरा(D11 °र) भूत्वा दुर्मनस्कामभागिनीं ❀ Cr दुःखपरम्परामिति पाठे दुःखपरामृष्टा मा दुःख भूयो दीपयन्निव उद्दीपयन्निव दीपयेदिति सबन्ध ।, Cm दुःख दुःखपरामृष्टामिति पाठे दुःख मा दीपयन् ज्वलयन्निव परितापयेदिति सबन्ध ❀

23 [a]) D4 अह (sic) (for अय). Ś1 D10 तु (for च) —[b]) D11 इह (for इव) —[c]) Ś1 D5 10 तत, D2 सु , D3 च, Ck t as in text (for त्वत्-) G2 -सकाशेषु, Ck t as in text (for -सहायेषु) D4 11 मम हस्त(D11 सुमहत्सु)सहायेषु —[d]) D11 हर्षेषु (subm), G3 हर्यक्षेषु (for हर्यृक्षेषु) Ñ1 कपीश्वर , D1 5 7 9 11 G1 Ck t हरीश्वर (G1 °रा)

24 [a]) Ś1 D8 कथ तु, Ñ1 D3 11 कथ हि, D1 कथञ्चित्, D2 10 कथ न Ñ1 D2–5 11 दु पार (for दुष्पार) —[b]) D3 महार्णव (for महोदधिम्) —[c]) D1–3 6–11 ह्(D9 ति)र्यक्ष (for हर्यृक्ष)

25 [a]) Ś1 D2–4 10 G1 अपि, Ck t as in text (for एव) —[b]) Ś1 D1 10 [अ]पि, Ñ1 T3 M1 3 [अ]स्य, D3 अभि, D4 अति, D5 [उ]प-, D11 G3 [इ]व (for [इ]ह) —Ś1 om 25[c]–27[b], D10 om 25[c]–27[a] —[d]) D11 च (for second वा)

26 Ś1 D10 om 26 (cf v l 25) —[a]) T1 3 G1 त्वम् (for तद) D1 एव (for अस्मिन्) D1 2 11 -स- (for -निर्) —[b]) D1 11 धी(D11 वी)रैश्च (for वीरैव) D2 देव हि दुरतिक्रम —[c]) D2 11 त्व (for कि) Ñ1 D7 9 पश्यसे —[d]) D3–5 8 G2 3 वर

27 Ś1 D10 om 27[a-b] and 27[a] respv (cf. v l 25) —[a]) T2 राघवस्य D1 एक (for एव) —[b]) D3 शक्त कार्यस्य साधने —[c]) D1 5 11 T3 M2 -वीरघ्नो (for °घ्न) —[d]) D2 4 यशसस् (for यशस्यम्) D1 4 11 तु (for ते) Ś1 Ñ1 D1 2 4 7 9 10 T1 M1 3 Ck फलोदय (D4 °ये) (for बलो°) D1 यशसस्तुल्यफलोदय (hypm)

28 Ś1 reads 28 in marg —[a]) Ś1 Ñ1 D1 2 4 10 11 समस्तैर् (for °ग्रैर्) Ś1 Ñ1 D7 9 बुधि (for यदि) —[b]) Ś1

बलैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः ।
मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ २९
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः ।
भवेदाहवशूरस्य तथा त्वमुपपादय ॥ ३०
तदर्थोपहितं वाक्यं सहितं हेतुसंहितम् ।
निशम्य हनुमाञ्शेषं वाक्यमुत्तरमब्रवीत् ॥ ३१
देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः ।
सुग्रीवः सत्त्वसम्पन्नस्तवार्थे कृतनिश्चयः ॥ ३२
स वानरसहस्राणां कोटीभिरभिसंवृतः ।
क्षिप्रमेष्यति वैदेहि राक्षसाना निबर्हणः ॥ ३३
तस्य विक्रमसम्पन्नाः सत्त्ववन्तो महाबलाः ।
मनःसंकल्पसंपाता निदेशे हरयः स्थिताः ॥ ३४
येषां नोपरि नाधस्तान्न तिर्यक्सज्जते गतिः ।
न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥ ३५
असकृत्तैर्महोत्साहैः ससागरधराधरा ।
प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥ ३६
मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः ।
मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसंनिधौ ॥ ३७
अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ।
न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥ ३८
तदलं परितापेन देवि शोको व्यपैतु ते ।
एकोत्पातेन ते लङ्कामेष्यन्ति हरियूथपाः ॥ ३९

G 5 0 0
B 5 39 40
L 5 36 39

N1 D1 2 4 10 11 विनिजित्य(D1 2 11 °जित्य च) दशानन, D3 जित्वा रावणमाहवे ❀ Cg जित्य जित्वा।, Ck विजित्य मा गृहीत्वा।, Ct जित्वा विजयी सन्मा गृहीत्वा ❀ —c) D3 G1 2 M3 स्वा(M3 स्व) पुरीं, D10 सुपुर, G3 M1 स्व पुर (for स्वपुर) Ś1 Ñ1 D1–4 10 11 रामो (for यायात्) —d) Ś1 Ñ1 यत्तत्स्याद्यद्य(Ñ1 °र्य)शस्कर, D1–4 10 11 नयेत्तत्स्याद्य-शस्करं, D7 9 G3 M1 तत्तस्य सदृश भवेत् —After 28, Ś1 Ñ1 D1–4 10 11 ins

880* सर्वराक्षसभर्तारं सूदयित्वेह रावणम् ।
नयेन्मा यदि काकुत्स्थ पर तत्स्याद्यशस्करम् ।
यथाह तस्य वीरस्य वञ्चयित्वा हृता बलात् ।
रक्षसा तद्भयादेव तथा नार्हति राघव ।

[Ś1 Ñ1 D10 om 1 1 and 2 D11 reads 1 1 and 2 after 1 3 —(1 1) D3 सूदयेच्च (for °यित्वा) —(1 3) D1 प्रमथ्यापहृता बलात्, D3 पापिनेपापिना हृता (for the post half) —(1 4) Ñ1 रक्षमां D4 [अ]र्हसि]

29 a) D3 बलै सु-, D6 8 G2]M3 Cr शरस्तु, Ck t बलस्तु (as in text) D4 10 सकुल (for सकुला) —f) D3 T1 बलार्दन (for °र्दन) D2 लका च रघुनन्दन —e) D1 11 मा (for मा)

30 a) T2 यद् (for तद्) —b) G1 इह, G1 इव (for महा) —c) D3 भवति (for भवेद्) D11 आहव- (for आहव-) D2 भवेदाहरतस्तस्य —d) D2 11 उपपादये (D11 °येत्), D3 उपधारय, G1 अपपादय (for उपपादय)

31 a) Ś1 तदर्थसहित (for °र्थोपहित) —b) D4 7–10 Ct प्रश्रि(D4 °सृ)त, D5 (also in marg) T1 2 G3 सहित, Cv r m g as in text (for सहित) Ś1 Ñ1 D11 प्रश्रि D11 °ह)त हेतुसमि(Ñ1 °यु, D11 °ह)त, D1–3 प्रसृत हेतु-सयु(D2 °ज्ञि, D3 °म)त —c) Ś1 D10 देव्या, D2 तस्या, D3 सीता (for शेष)

32 a) D8 देव D1–4 8–11 G3 M1 हर्यक्ष- (for हर्यृक्ष-) —b) Ś1 D4 10 प्लवगोत्तम (for °तां वर) —c) D4 5 7–9 T3 सत्य- (for सत्त्व-) T2 सुग्रीव सत्यसमश्च —d) Ś1 त्वदर्थे (for तदर्थे) —After 32, D10 ins

881* तदर्थे सत्त्वसम्पन्नो विनीत सत्यवान्शुचि ।

33 Ś1 om 33ab —b) D4 5 9 11 कोटिभिर् —d) Ś1 D10 11 निपूदन, Ñ1 D1–4 निपूदक (for निबर्हण)

34 c) Ś1 -सपन्ना, D4 -सपात, D11 -सजाता (for -सपाता)

35 a) Ś1 D4 10 11 तेषा —b) D3 न निर्यग्वलन गते —d) D2 महत्स्वप्यति- (for °मित-) Ś1 D10 -विक्रमा (for -तेजस) D3 महत्स्वप्यमितौजस

36 a) D2 11 असकृत्तैर् (for असकृत्तैर्) —b) Ś1 D3 10 -वना(Ś1 °रा)वरा, Ck t as in text (for -धराधरा) —c) Ñ1 [अ]मीभि (for भूमिर्) —d) Ñ1 D1 2 11 सर्व- (for वायु-) Ś1 D3 10 -वेग, Ñ1 * (for -मार्ग)

37 a) D10 तुर्णाश्च (sic) (for तुल्याश्च) Ñ1 वा (for च) —After 37ab, Ñ1 ins

882* बहवो वानरा देवि महान्तोऽतुलविक्रमा ।

—c) D10 स तु (sic) (for मत्त) —d) Ñ1 आस्ते (for नास्ति)

38 b) T2 महौजस (for महाबला) —d) D1 2 11 प्रेष्य(D2 °दृश)न्ते हीनतेजस, T2 प्रेष्यन्त इतरे जना

39 b) M1 व्यपोहतु (for व्यपेतु ते) Ś1 Ñ1 D1–4 10 देवि मन्युरपेतु ते, D11 न देवि पुरपैन्तु ते (sic) —c) D3 G1 2 M2 वे (for ते) —d) Ś1 Ñ1 D2 4 10 11 -पुगवा (for यूथपा)

G 5 00 0
B 5 39 41
L 5 36 40

मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ ।
त्वत्सकाशं महासत्त्वौ नृसिंहावागमिष्यतः ॥ ४०

तौ हि वीरौ नरवरौ सहितौ रामलक्ष्मणौ ।
आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः ॥ ४१

सगणं रावणं हत्वा राघवो रघुनन्दनः ।
त्वामादाय वरारोहे स्वपुरं प्रतियास्यति ॥ ४२

तदाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी ।
नचिराद्द्रक्ष्यसे रामं प्रज्वलन्तमिवानलम् ॥ ४३

निहते राक्षसेन्द्रे च सपुत्रामात्यबान्धवे ।
त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ॥ ४४

क्षिप्रं त्वं देवि शोकस्य पारं यास्यसि मैथिलि ।
रावणं चैव रामेण निहतं द्रक्ष्यसेऽचिरात् ॥ ४५

एवमाश्वास्य वैदेहीं हनूमान्मारुतात्मजः ।
गमनाय मतिं कृत्वा वैदेहीं पुनरब्रवीत् ॥ ४६

तमरिघ्नं कृतात्मानं क्षिप्रं द्रक्ष्यसि राघवम् ।
लक्ष्मणं च धनुष्पाणिं लङ्काद्वारमुपस्थितम् ॥ ४७

नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् ।
वानरान्वारणेन्द्राभान्क्षिप्रं द्रक्ष्यसि संगतान् ॥ ४८

शैलाम्बुदनिकाशानां लङ्कामलयसानुषु ।
नर्दतां कपिमुख्यानामार्ये यूथान्यनेकशः ॥ ४९

---

40 [a]) Ś1 D10 M1 तु, D11 हि (for च) —[b]) N1 सूर्यचन्द्रौ (by transp) D1 चन्द्रसूर्यव्यवस्थितौ —[c]) D1 2 सकाशे (for -सकाश) D1 7 9 महासत्त्वौ (D1 °सिंहौ), D2 हि वैदेहि (for महासत्त्वौ) —[d]) Ś1 Ñ1 D4 राजपुत्रावितो (D4 °वै)ष्यत, D1 2 इह (D2 तौ च) सिंहाविवैष्यत', D10 11 राजपुत्रावितोष्यत.

41 D2 om. 41 —[a]) Ś1 Ñ1 D1 3 10 11 तौ च, D5 T1 3 G3 M2 ततो, T2 उभौ (for तौ हि) G1 -व्याघ्रौ (for -वरौ) D4 तौ च वीरावरौ —[c]) Ś1 D4 10 आगत्य (for आगम्य) —[d]) D11 विधमिष्यति (sic)

42 [a]) Ñ1 सबल (for सगण) —[b]) Ñ1 राघवौ रघुनन्दनौ —[d]) Ñ1 T1 स्व (for स्व). Ś1 D2 3 7 T1 G2 स्वपुरीं, D4 6-10 स्वा पुरीं (for स्वपुर) Ñ1 -यास्यत (for -यास्यति)

43 [a]) G3 M2 समाश्वसिहि D10 11 तदाश्व(D11 °स्व)-मिह (sic) भद्र ते —[b]) M1 परिस्राक्षिणी, Cr m g t as in text (for काल°) —[c]) Ś1 D2 10 M2 अचिराद् —[d]) Ś1 D1 2 10 ज्वलतमिव भास्कर —For 43[c-d], Ñ1 D3 4 11 subst

883* अचिराद्द्रक्ष्यसि पतिं पतन्तमिव भास्करम् ।

[D3 द्रष्टासि रामनचिराद् (for the prior half) D4 उदितम् (for पतन्तम्) D3 ज्वलतमिव पावक (for the post half)]

44 [a]) Ś1 D1-5 10 11 तु, M1 [ś]स्मिन् (for च) —[b]) D11 G1 यादव (for बान्धवे) —After 44[c], D11 erroneously reads 45[d] and repeats 44[c] —[d]) D2 6 9 [ग]व (for [ङ]व) D11 शशाङ्कमिव रोहिणी

45 Ś om 45 —[a]) D4 वदेहि, D3 एष्यसि, G1 च देवि (for त्व देवि) D10 क्षिप्रमेष्यसि वैदेहि —[b]) Ñ1 D7 9 द्रक्ष्यसि, D3 एष्यसि, D10 कोपस्य (for यास्यसि) D8 पर पारं च मैथिलि —[c]) Ñ1 D1-4 10 11 क्षिप्र द्रक्ष्यसि रामेण —[d]) Ñ1 D2 4 10 11 रावण रणे (for द्रक्ष्यसेऽचिरात्). D1 3 रावणं निहत युधि (D3 रणे) D7 9 द्रक्ष्यसे निहत बलात्.

46 [c]) D3 मन (for मति) D1 चक्रे (for कृत्वा) —[d]) D4 8 मैथिलीं (for वैदेहीं) Ś1 D10 इदम् (for पुनर्)

47 [a]) Ś1 D2 4 10 11 महात्मान (Ś1 D10 °भाग) (for कृता मान) —[c]) Ñ1 D1-4 10 11 स(D10 सु)सुग्रीव (for धनुष्पाणि) Ś1 लक्ष्मणं सहसुग्रीव· G1 लक्ष्मणेन सह भ्रात्रा. —[d]) Ñ1 D5 7 9 T2 G1 -[आ]गत (for -स्थितम्) —After 47, M1 ins

884* सुग्रीवसहित शूर वानरैः परिवारितम् ।

48 Ś1 om 48-49 —[a]) D2 4 10 भीमान्, D3 एतान् (for वीरान्) —[c]) Ñ1 वानरेन्द्रं च, D1-4 11 T3 वानरैं(D4 पर्वते)न्द्राभान, D8 वानरेन्द्रेण (for वारणेन्द्राभान) —[d]) D1 सवश, D2 सहतान् (for सगतान्)

49 Ś1 om 49 (cf v[l] 48) —[a]) D2 शिला-(for शैल-) Ñ1 -समानाना, G3 °शाश्च (for निकाशाना) —[c]) D10 नदता (for नर्दता) D1 हरिसैन्याना, D2-4 10 11 हरि°, G2 वानरेन्द्राणाम् (for कपिमुख्याना) Ñ1 नर्दता हरिमुख्याना —[d]) D2 मार्ग, M1 मध्ये (for आर्ये) D1 3 4 10 T2 आर्ये श्रोष्यसि नि स्वन, D5 8 T1 2 G2 अचिराच्छ्रोष्यसि स्वन(D8 T1 ध्वनिं) ॐ Cv नर्दता कपिमुख्यानामार्ये यूथान्यनेकश इति। द्रक्ष्यसीत्येव क्रियापदम्।, Cr नर्दता वानरेन्द्राणामचिरा च्छ्रोष्यसि स्वनमिति पाठ ॐ —After 49, D1 3 ins.

885* त्वत्कृते च विशालाक्षि रामो राजीवलोचन ।
दुःखमास्ते महाभागश्चिन्तयानो दिवानिशम् ।

स तु मर्मणि घोरेण ताडितो मन्मथेषुणा ।
न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ५०
मा रुदो देवि शोकेन मा भूत्ते मनसोऽप्रियम् ।
शचीव पत्या शक्रेण भर्त्रा नाथवती ह्यसि ॥ ५१
रामाद्विशिष्टः कोऽन्योऽस्ति कश्चित्सौमित्रिणा समः ।
अग्निमारुतकल्पौ तौ भ्रातरौ तव संश्रयौ ॥ ५२
नाग्निश्चिरं वत्स्यसि देवि देशे
रक्षोगणैरध्युषितेऽतिरौद्रे ।
न ते चिरादागमनं प्रियस्य
क्षमस्व मत्संगमकालमात्रम् ॥ ५३

G 5 0 0
B 5 39 51
L 5 36 53

इति श्रीरामायणे सुन्दरकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

Arya Research Team

50 [a]) Ñ1 हि (for तु) Ś1 D1 9 10 11 स हि मर्मसु (Ś1 °न्मथ- D11 °र्मेण) घोरेण, D2 4 स हि मर्मसु घोरेषु —[b]) Ñ1 मदनेषुणा

51 [a]) D5 7 9 T2 रुद मा, D6 अल ते, G9 रुदो मा (by transp.), Cg as in text (for मा रुदो) G3 ते विशोकेन (for देवि शोकेन) Ś1 D1 4 10 11 मा शुचो देवि शोकार्हे (Ś1 D10 °र्ते), Ñ1 श्रुत्वा मा देवि शोकार्ते, D2 मा शोचीर्देवि शोकार्हे, D3 मा माशु देव्यशोकार्हे —[b]) Ś1 Ñ1 D1-4 10 11 मनसि (D2 °सा, D3 °स) क्रम (Ñ1 ज्वर), D5 7 9 T2 मनसो भय (for मनसोऽप्रियम्) —[c]) D7-9 भर्त्रा (for पत्या) Ś1 D10 शचीवेन्द्रेण सीते त्व, Ñ1 D1-4 11 वासिनी (D3 चकासे, D4 सहिता) श्रीरिवेन्द्रेण —[d]) D8 M1 पत्या (for भर्त्रा) D7 9 सगमेष्यसि शोभने

52 [a]) Ś1 D10 को विशिष्टो हि रामेण —[b]) Ś1 D10 को वा, D3 कश्चित्, T1 2 G1 2 M2 कश्च (for कश्चित्). G1 M1 सह (for सम) —For 52[ab], Ñ1 D1-4 11 subst

886* को विशिष्टस्तु रामेण सौमित्रेर्वापि क सम ।
[D7 लक्ष्मणेन च, D1 सौमित्रेणापि (for सौमित्रेर्वापि)]

—[c]) Ś1 Ñ1 D1 तु (for तौ) —[d]) Ñ1 सश्रय, D1 4 सश्रय (sic) (for सश्रयौ) D3 आश्रयन्त्र, D8 रणसश्रयौ, D11 नात्र सशय, M2 रामलक्ष्मणौ (for तव सश्रयौ)

53 [a]) D2 4 G3 M2 वत्स्यति, D11 om (for वत्स्यसि) D7 (marg.) चात्र (for देवि) —[b]) D8 M1 हि (for इति) —[c]) Ñ1 प्रियेति (for प्रियस्य) —[d]) Ś1 Ñ1 D1 2 4 10 11 तत्- (for मत्) D3 क्षमस्व तत्समागमनाय काल

Colophon Ñ2 V1 2 B D6 om —*Sarga name* Ś1 D1 2 4 10 11 सीताप्रत्याश्वासन (Ś1 D10 11 °न), Ñ1 सीतासमाश्वासन, D7 सीताश्वासन —*Sarga no* (figures, words or both) Ñ1 D1 2 4 10 11 om, Ś1 D5 7-9 ! G M1 3 39, D9 41, M2 38 —After colophon, G concludes with श्रीरामाय नम

३८

G. 5. 37. 1
B. 5 40 1
L 5 37 1

श्रुत्वा तु वचनं तस्य वायुसूनोर्महात्मनः ।
उवाचात्महितं वाक्यं सीता सुरसुतोपमा ॥ १

त्वां दृष्ट्वा प्रियवक्तारं संप्रहृष्यामि वानर ।
अर्धसंजातसस्येव वृष्टिं प्राप्य वसुंधरा ॥ २

यथा तं पुरुषव्याघ्र गात्रैः शोकाभिकर्शितैः ।
संस्पृशेयं सकामाहं तथा कुरु दयां मयि ॥ ३

अभिज्ञानं च रामस्य दत्तं हरिगणोत्तम ।
क्षिप्तामिषीकां काकस्य कोपादेकाक्षिशातनीम् ॥ ४

मनःशिलायास्तिलको गण्डपार्श्वे निवेशितः ।
त्वया प्रनष्टे तिलके तं किल स्मर्तुमर्हसि ॥ ५

स वीर्यवान्कथं सीतां हृतां समनुमन्यसे ।
वसन्तीं रक्षसां मध्ये महेन्द्रवरुणोपम ॥ ६

38

M2 begins with श्रीरामाय नम

1 ^{b}) G2 वानरस्य (for वायुसूनोर्) —For 1^{ab}, Ś1 Ñ V B D1-4 6 10 11 subst

887* एवमुक्ता हनुमता प्रिय वाक्य मनोहरम् ।

[Ś1 Ñ V B D1 2 4 6 उक्त्वा V2 B D6 हनूमत (for हनुमता) D6 प्रिय- Ś1 B4 D4 अनुत्तम V2 B1-3 D2 11 मनोरम (for मनोहरम्)]

—D2 reads 1^{cd} in marg —^{c}) B3 [अ]थ हित, B4 [अं]तर्हित, M1 [अ]भिमत, Cm k t as in text (for [आ]त्महित) Ś1 Ñ V1 B2-4 D1-4 6 10 11 सीता (for वाक्य) —^{d}) Ś1 Ñ V B D1-4 6 10 11 गमिष्यत प्लवगम

2 ^{a}) D6 त्वा —^{b}) Ś1 Ñ2 V B D1 3 4 6 10 प्रहृष्यामि प्लवगम, Ñ1 D11 गमिष्यामि परा मुद, D2 प्रहृष्यति प्लवगमा —D4 om 2^{c}-4 T1 damaged for 2^{c}-3^{b} —^{d}) Ś1 Ñ1 D1 2 10 11 प्राप्य वृष्टि (by transp), Ñ2 V B D6 तोय प्राप्य (for वृष्टि प्राप्य) —After 2, D3 ins

888* सत्समाश्वासिता चास्मि वार्तया राघवस्य हि ।
एवमुक्तस्तु वचन जानक्या सुमनोहरम् ।
उवाच प्राञ्जलिर्वीर पुनर्वाक्य विभीतवत ।

—Thereafter D3 reads 17-18 (including 894*)

3 D3 4 om 3 (for D4, cf v l 2) T1 damaged for 3^{ab} (cf v l 2) —^{a}) D5 च, G2 [अ]ह (for त) —^{b}) D6 7 9 -कपिने —For 3^{ab}, Ś1 Ñ V B D1 2 6 10 11 subst

889* अन्य रामान्न पुरुष गात्रमेतिमता वर ।

[Ś1 Ñ1 D1 2 10 11 पुमास राघवादन्य (for the prior half) D6 गात्र (for गात्रर्) V गतिमता (for मतिमता) Ñ1 वर]

—^{c}) Ś1 Ñ1 D10 न स्पृशेय(Ś1 °ह), D1 2 11 स्पृशेय न, M2 सस्पर्शेयं (for सस्पृशेयं) B3 महाकाय, D2 11 सकामापि(D11 °मा वे), D8 समाप्नुता (for सकामाह) —^{d}) D8 transp कुरु and मयि Ś1 Ñ1 D1 2 10 11 व्रतमेतत्पर (D1 °त्पुरा) मम, Ñ2 V B1-3 D6 वर एष वृतो मया, B4 व्रत वे तत्कृत मया

4 Ś1 reads 4-8^{ab} in marg —^{a}) Ś1 Ñ2 V2 B D1-4 6 10 11 तु, Ñ1 G3 हि (for च) Ś1 Ñ2 V B D6 10 M1 रामाय (for रामस्य) —^{b}) D6 तया, D7 9 Cg t दया, D8 G2 M2 3 दया, Cv k as in text (for दत्त) T2 G2 M1 -गणेश्वर (for -गणोत्तम) Ś1 Ñ V B D1-4 6 10 11 दयास्त्वं हरिपुगव —^{c}) B4 क्षिप्तेषीका तु, D1 G2(after corr as in text) 3 M2 क्षिप्त्वा त्विषीका, M1 इषीका गृह्य (for क्षिप्तामिषीकां) Ś1 D6 10 काकाय V2 क्षिप्ता तामिषिका काके —^{d}) D7 9 -नाशिनीं (for शातनीम्) Ś1 Ñ1 D1-4 10 11 एकाक्षिनाशिनीं Ñ2 V B D6 रोषादेकाक्षता(B3 °पा)तनीं

5 Ś1 reads 5 in marg (cf v l 4) —^{b}) B3 गर्तदेशे (for गण्डपार्श्वे) D3 निवेजित (for निवेशित) —^{c}) D5 T1 7 G M1 3 Cr प्रणष्टे Ś1 D2 4 10 11 त्वया प्रनष्टेन मम(D2 4 स मे), Ñ1 त्वया प्रमृष्टस्तिलकस्, Ñ2 V B D3 6 त्वया प्रमृ(V2 B2 7 D3 6 °सृ[sic])ष्ट स च मे, D1 त्वया प्रनष्टतिलकस् —^{d}) Ś1 D10 तत्पुन , Ñ V1 B1-3 D3 6 तच्च म(Ñ1 त्व), V2 B4 त च म, D2 तिलक, D4 त पुन , D5 तत्किल, D11 T2 G3 त्व किल, Cm k t as in text (for त किल) D8 स्मर्तुमर्हसि वीर्यवान

6 Ś1 reads 6 in marg (cf. v l 4) —^{ab}) Ś1 D10 हमा, Ñ1 D3 4 11 हि मा, D1 हि सन , D2 हित (sic) (for कथ) D3 4 नीता (for सीता) T2 G1 तामनु-, G3 M1 मामनु- (for समनु-) T1 2 -मन्यते Ś1 Ñ1 D1-1 10 11 कथ त्व समुपेक्षसे(D2 °सि) (for ^{b}) Ñ2 V B2-4 D6 कि रावणगृहे सीतामुपेक्षसि(V °क्षेथा, B4 °क्षिता [sic]) परन्तप, D8 रावणेन हृता सीता कथ मामनुमन्यसे —^{c}) Ñ2 V B D6 राक्षसावासे, G1 राक्षसीमध्ये (for रक्षसा मध्ये). —^{d}) Ś1 V2 D4 6 10 11 T2 G1 M3 वरुणोपम —After 6, Ñ2 V B D6 ins

890* ब्रूयाश्चैव हरिश्रेष्ठ मम कान्त रघूत्तमम् ।
[B1-3 ब्रूयाच्चैव(B3 °च)]

Arya Research Team

एष चूडामणिर्दिव्यो मया सुपरिरक्षितः ।
एतं दृष्ट्वा प्रहृष्यामि व्यसने त्वामिवानघ ॥ ७
एष निर्यातितः श्रीमान्मया ते वारिसंभवः ।
अतः परं न शक्ष्यामि जीवितुं शोकलालसा ॥ ८
असह्यानि च दुःखानि वाचश्च हृदयच्छिदः ।
राक्षसीनां सुघोराणां त्वत्कृते मर्षयाम्यहम् ॥ ९
धारयिष्यामि मासं तु जीवितं शत्रुसूदन ।
मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज ॥ १०

घोरो राक्षसराजोऽयं दृष्टिश्च न सुखा मयि ।
त्वां च श्रुत्वा विपद्यन्तं न जीवेयमहं क्षणम् ॥ ११
वैदेह्या वचनं श्रुत्वा करुणं साश्रु भाषितम् ।
अथाब्रवीन्महातेजा हनुमान्मारुतात्मजः ॥ १२
त्वच्छोकविमुखो रामो देवि सत्येन ते शपे ।
रामे शोकाभिभूते तु लक्ष्मणः परितप्यते ॥ १३
दृष्टा कथंचिद्भवती न कालः परिशोचितुम् ।
इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि ॥ १४

G. 5 37
B 5 40
L 5 37

7 Ś1 reads 7 in marg (cf v l 4) D3 transp ^{ab} and ^{cd} —^{a}) D3 स वै (for एष) —^{b}) D3 नित्य (for मया) D7 9 म (for सु-) —^{c}) Ś1 D5 10 T2 G2 एन, G3 M1 2 एतद् (for एत) Ñ2 V B D3 6 य(B4 त्वा) दृष्ट्वा स (D3 च), D8 त्वा दृष्ट्वैव (for एत दृष्ट्वा) —^{d}) Ñ2 V B D6 [s]पि तव, T2 त्वामिह (for त्वामिव) D8 व्यसने तु महोदये

8 Ś1 reads 8^{ab} in marg (cf v l 4) —^{a}) D3 निर्यापित (for निर्यातित) D4 सोद्य (for श्रीमान) —^{b}) Ñ1 वारीशसंभव (hypm) (for वारिस$^{\circ}$) —After 8^{ab}, Ñ2 V B D6 read 891* —^{c}) Ñ2 V1 B2 D6 तत पर, D3 विना तेन (for अत पर) D9 om न (subm) B शक्यामि (sic), D6 पश्यामि (for शक्ष्यामि) —^{d}) D2 6 जीवित Ś1 Ñ1 D2 3 10 11 शोककर्षि(D2 3 11 °र्शि)ता, Ñ2 D6 शत्रुसूदन, V B1 2 4 शत्रु(V1 शोक)कर्षण, B3 शत्रुघातिनी (for शोकलालसा)

9 ^{a}) D2 5 G1 M2 हि, G3 [ह]ह (for च) V2 B2 4 D10 अशक्यानि च, T2 असह्यानि च, G2 अविषह्यानि (for असह्यानि च) —^{b}) Ś1 Ñ1 D10 हृदयस्थिता —^{c}) D2 5 राक्षसाना V1 B2 D1 3 4 च घो(B2 क्र)राणा, B4 (marg) वचस्तीक्ष्ण (for सुघोराणा) D7 9 राक्षस सह सवास

10 ^{a}) D11 धर्षयिष्यामि —^{b}) D5 11 जीवितु D3 -कर्शन (for सूदन) —^{c}) Ś1 Ñ1 D1–4 10 11 ऊर्ध्वं मासान्न जीवेय —^{d}) S1 D10 नरर्षभ (for नृपात्मज) —For 10, Ñ2 V B D6 subst and read after 8^{ab}

891* मासमेक च जीवेय तवागमनकाङ्क्षया ।
[B4 तु (for च)]

11 ^{a}) Ś1 D10 च (for ऽय) —^{b}) Ś1 Ñ1 D4 10 दुष्टश्च (Ñ1 illeg from श्च up to 11^{c}, D4 दुश्चरो) न सुख च मे, Ñ2 V B D1 2 6 11 अध्रुव(D2 °दुष्ट)श्च रणे(B2 परा-)जय, D3 प्रयत्नेनाभिसर्पना, D8 M1 न दृष्टा सुख(M1 °ग्वि)ता मयि, T2 दृष्टश्चैव त्वयानघ —^{c}) Ñ2 V B1–3 D2 6 G2 च दृष्ट्वा, B4 अदृष्ट्वा, D4 श्रुत्वा च (by transp), Ct as in text (for च श्रुत्वा) Ś1 D10 G1 विलपत, Ñ2 V1 B D6 विपीडन, D1 3 निरुद्योग, D5 7–9 G2 3 विपज्जत, T1 2 विपद्येय (for विपद्यन्त) ❀ Cv विपद्यन्त शोकेनावसीदन्तम् । अन्ये पूर्वोक्तैर्मरणहेतुभि सह तव शोकश्चेदानीं मरणहेतुभिरित्यभिप्राय । विपज्जन्तमिति सम्यक् पाठ । विपन्नो विलम्ब ?1, Cr g विपज्जन्त विलम्बमानम् (Cr अयमेव पाठ साधु)1, Cm विपद्यन्तमिति पाठे क्रियन्तम्1, Ct विपज्जन्त विलम्ब कुर्वाणम्(Ct °र्वन्तम्) ❀ —^{d}) Ñ1 D6 असशय, D7 9 अपि क्षण (for अह क्षणम्) —After 11, D1 3 ins

892* एव च ब्रुवती सीता बाष्पव्याकुललोचना ।
शोकाभिभूता तन्वङ्गी न शशाकाभिभाषितुम् ।
यत्न सभावितु वक्तु वैदेह्यापहत वच ।
पक्ष्ममालापरिभ्रष्टैस्तदुक्त बाष्पबिन्दुभि ।

[(1 1) D1 तु (for च) D1 -[आ]कुलवि- (-व्याकुल-) —(1 3) D1 च सभाषितु (for न सभावितु) and हृदन (for [अ]पहत)]

12 Ñ2 V B D6 om 12–20^{ab} —^{a}) D11 कारण (for वचन) and वचन (for करुण) Ñ1 D1 2 transp वचन and करुण Ś1 D10 चार, D1 2 4 11 G3 M1 साधु (for साश्रु) T2 पातन (for भाषितम्) D3 वैदेह्या बाष्पपूर्णाक्ष्या साश्रु सकरुण वच —^{c}) T2 तदा (for अथ) —^{d}) D3 पवनात्मज

13 Ñ2 V B D6 om 13 (cf v l 12) —^{a}) Ñ1 D2 4 10 -[अ]भिमुखो, D1 11 -[अ]भिहतो, D3 -विमना (for -विमुखो) —^{b}) D11 सत्त्वेन (for सत्येन) —^{c}) T2 G2 M3 दुःख- (for शोक-) D5 8 -भूते च, G1 -तस्ते च, G3 -पन्ने तु (for भूते तु) Ś1 Ñ1 D1 3 4 10 रामदु खाभिभूतश्च, D2 11 M1 2 रामशोकाभिभूतश्च(M1 2 °ते च) —^{d}) Ñ1 प्राज्ञमत्तम (for परितप्यते) —After 13, Ñ1 ins

893* अत्यर्थं वीर्यगर्वेण सतत परितप्यते ।

14 Ñ2 V B D6 om 14 (cf v l 12) —^{a}) D4 5 8 11 G3 दृष्ट्वा (sic) (for दृष्टा) T1 3 M3 कथचिद्भवती दृष्टा. —^{b}) D2 7 9 परिदेवितु —^{c}) Ś1 D5 8 T G1 3 M1 2 Ct इद, Cm g t as in text (for इम) D2 सुमुहूर्तं (hypm) (for मुहूर्तं) ❀ Cm g इम मुहूर्तम् अस्मिन्मुहूर्ते, Ct.

G 5 37 0
B 5 40 15
I 5 37 15

तावुभौ पुरुषव्याघ्रौ राजपुत्रावनिन्दितौ ।
त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ १५
हत्वा तु समरे क्रूरं रावणं सहबान्धवम् ।
राघवौ त्वां विशालाक्षि स्वां पुरीं प्रापयिष्यतः ॥ १६
यत्तु रामो विजानीयादभिज्ञानमनिन्दिते ।
प्रीतिसजननं तस्य भूयस्त्वं दातुमर्हसि ॥ १७
साब्रवीद्वत्तमेवेह मयाभिज्ञानमुत्तमम् ।
एतदेव हि रामस्य दृष्ट्वा मत्केशभूषणम् ।
श्रद्धेयं हनुमन्वाक्यं तव वीर भविष्यति ॥ १८
स तं मणिवरं गृह्य श्रीमान्प्लवगसत्तमः ।
प्रणम्य शिरसा देवीं गमनायोपचक्रमे ॥ १९
तमुत्पातकृतोत्साहमवेक्ष्य हरिपुंगवम् ।
वर्धमानं महावेगमुवाच जनकात्मजा ।
अश्रुपूर्णमुखी दीना बाष्पगद्गदया गिरा ॥ २०
हनूमन्मिहमकाशौ भ्रातरौ रामलक्ष्मणौ ।
सुग्रीवं च महामात्यं सर्वान्वृया अनामयम् ॥ २१

इम(Ck °द) मुहूर्तम् अस्मिन्नचिरकाल इत्यर्थ . —$^{a-d}$) Ś1 D1 2 4 10 11 गच्छसि, Ñ1 यास्यसि (for द्रक्ष्यसि) Ñ2 D11 भाविनि

15 Ñ2 V B D6 om 15 (cf v l 12) —^{a}) Ñ1 D4 नरशार्दूलौ (for पुरुषव्याघ्रौ) —^{b}) T1 3 G2 M3 अरिदमौ (for अनिन्दितौ)

16 Ñ2 V B D6 om 16 (cf v l 12) —^{a}) Ś1 D10 हत्वा त, Ñ1 स हत्वा, D2 4 हत्वा स (for हत्वा तु) Ś1 D10 शर, Ñ1 D1-4 11 शरो, D5 7 9 T2 G3 रक्षो, D8 M1 2 घोर (for क्रूर) —^{b}) Ś1 D4 10 -राक्षस, Ñ1 D8-9 T2 G1 3 M1 बाधव (for बान्धवम्) —^{c}) Ś1 Ñ1 D1-4 9 10 11 G1 3 M1 राघवस् (for राघवौ) Ś1 D1 4 विशालाक्षी. —^{d}) Ñ1 पुरीं स्वा (by transp) Ś1 Ñ1 D1-4 10 11 G1 3 M1 प्रापयिष्यति, D7-9 M2 प्रति नेष्यत (D8 °ति) (for प्रापयिष्यत) —After 16, Ś1 ins 904*

17 Ñ2 V B D6 om 17 (cf v l 12) Ś1 om 17-19 D3 reads 17-18 (including 894*) after 2 (preceded by 888*) —^{a}) D3 11 हि, D2 4 10 G2 M1 2 [s]भि-, Ct as in text (for वि) —$^{c-d}$) Ñ1 D7 9 भूयस्तस्य (by transp)

18 Ñ2 V B D6 om 18 (cf v l 12) Ś1 om 18 (cf v l 17) D11 om from 18 up to कपि in 24^{b} Ñ1 om 18^{a-b} D3 reads 17-18 (including 894*) after 2 (preceded by 888*) —^{a}) D1 2 4 10 एतत्ते, D3 एवंतद, D7 9 एवाहो, T1 3 G2 M3 एवेति, G1 एवेद (for एवेह) —^{b}) T2 मम (for मया) D3 अभिज्ञानमनुत्तम —After 18^{a-b}, D1-4 10 ins, Ñ1 ins before 16^{c-d}.

894* वेणीशोभाकरं मत्र मणिरत्न प्लवंगम ।

[D3 केश- (for वेणी-) D4.10 दिव्य (for मत्र) Ñ1 महा-युते (for प्लवंगम)]

—^{c}) D4 रामश्च (sic) (for रामस्य) —^{d}) Ñ1 D7 9 यत्नेन, D10 केशवि-, T2 मच्चीर्ष (for मत्केश) —After 18^{c-d}, Ñ1 (partly illeg) ins

895* श्रद्धास्यति महाबाहुर्वैदेहीसमन्वित ।
सर्वानि वचन प्राप्य * * * * * * * ।

—^{e}) D3 8 हनुमत (for हनुमन्) —^{f}) D10 सर्वं (for वीर) —After 18, Ñ1 D2 10 ins 904*

19 Ñ2 V B D6 om 19 (cf v l 12) Ś1 D11 om 19 (cf v l 17 and 18 respy) D2 om 19-20^{a-1}. —$^{a-b}$) D3 एवमाश्वास्य वैदेहीं श्रीमान्वानरपुंगव .—For 19^{a-b}, Ñ1 D1 4 10 subst

896* गृहाण त्वं मणिं दत्त श्रीमन् प्लवगोत्तम ।

[Ñ1 °, D1 [illegible] (for तु) D10 दत्त्वा (for दत्त) Ñ2 हरिसत्तम (for प्लवंग°)]

—^{c}) Ñ1 D1 4 शिरसा(Ñ1 °सामि [hy pm.])वन्द्य वैदेहीं, D3 शिरसा चरणौ नत्वा

20 Ñ2 V B D6 om 20^{a-b} (cf v l 12) D11 om. 20 (cf v l 18) D2 om 20^{a-1} (cf. v l 19) —^{a}) Ś1 Ñ1 D10 समु(Ñ1 गतु)त्पात- —^{b}) Ś1 D10 समीक्ष्य (for अवेक्ष्य) D3 प्लवतां वर, D5 7 9 G2 हरियूथप, T2 M3 हरिसत्तम —Ñ2 V B D6 read 20^{c-d}/$^{e-f}$ (including 897* and 895*) before 23 —^{c}) Ś1 D10 महात्मानम्; Ñ2 V B D6 कृतोत्साहम् (for महावेगम्). —^{e}) Ś1 D10 वाक्यं D1 2 4 श्यामा (for दीना) —^{f}) Ñ2 D1-4 6 9 G1 3 M1 2 सदिग्धया (for गद्गदया) Ś1 D10 मारुतिं(D10 उवाच) कपिसत्तम —After 20, Ś1 Ñ V B D1-4 6 10 ins

897* हनुमद्वचनोद्भूतशोकसक्तसमानसा ।

[B4 -वचन (for गात्र-) Ś1 Ñ1 D1-4 10 हनुमद्गत- (Ś1 Ñ1 D10 °मे)व्यग्र, V2 हनुमन्मुखा वाक्य, B2 हनुमत पुनोद्भव (for the prior half) V2 B -मनसा- (for सक्त).]

—Thereafter Ñ2 V B D6 cont.

898* हनूमन्कपिशार्दूल मम दुःखविमोचनम् ।
यथा भवति भद्रं ते तथा त्वं कर्तुमर्हसि ॥

[(1 1) B2 दुःखानाम (by transp).]

21 D11 om 21 (cf v l 18) —^{a}) G1 भीम- (for सिंह) —^{c}) D8 10 महामात्य (for महा°). —^{d}) Ś1

यथा च स महाबाहुर्मां तारयति राघवः।
अस्माद्दुःखाम्बुसंरोधात्तत्समाधातुमर्हसि ॥ २२

इमं च तीव्रं मम शोकवेगं
रक्षोभिरेभिः परिभर्त्सनं च।
ब्रूयास्तु रामस्य गतः समीपं
शिवश्च तेऽध्वास्तु हरिप्रवीर ॥ २३

G 5 37
B 5 40
L 5 37

D1-4 8 10 G1 M1 2 त्वनामय, Ñ1 T1 3 G2 3 M3 ह्यनामय, T2 ममामय —For 21, Ñ2 V B D6 subst

899* अनामय च ब्रूयास्त्व सहितो रामलक्ष्मणा।
सुग्रीव च महासत्त्व सर्वान्वृद्धाश्च वानरान्।

[Cf 5 37 7 —(1 1) B1 सर्व वे (for सहितो) —V2 om 1 2 —(1 2) D6 तु (for second च) B2 सर्वान्वानरयुगवान् (for the post half)]

22 D11 om 22 (cf v l 18) = 5 37 8 —[a]) Ñ1 तथा (for यथा) D1 स च (by transp), I2 [अ]थ स (for च स) G3 अथापि स —[cd]) G3 damaged from सा up to च in 23[a] Ś1 D10 सुदु ख-, D1 दु खोप-, D2 दु खानु, D3 दु खात्तु (for दु खाम्बु) D7-9 T2 G1 2 M2 3 Ck t त्व (for तत्) D2 तथा सधातुमर्हसि (for [d]) Ñ1 °, ,,,,,, तुमर्हसि ❀ Ct त्व समाधातुमित्यस्य तथेत्यादि। समाधान सविधानम्। 'अथापि स महाबाहु' इति पाठे यथेत्यपि पूरणीयमेव। यद्यपि श्रुतवृत्तान्त स्वयमेव यतिष्यति तथापि त्वमपि यथा मा शीघ्र तारयसि तथा सविधान कुर्वित्यर्थ ❀ —For 22, Ñ2 V B D6 subst

900* जीवन्तीं मा यथा राम सभावयति कीर्तिमान्।
तत्त्वया हनुमन्वाक्य वाच्य धर्ममवाप्नुहि।

[Cf 5 37 9 —(1 1) B1 2 4 संभावयति (for सभाव°) —(1 2) B4 स (for तत्) Ñ2 V1 वाक्य वाचा (sic), B4 D6 वाच्यो (D6 °च्य) वाचा (for वाक्य वाच्य) Ñ2 समाप्नुहि]

—Then all the above MSS cont

901* {नित्यमुत्साहयुक्तस्य श्रुत्वा वाक्य तवानघ।
(37 10) {वर्धिष्यते दाशरथे पौरुष मत्त्राक्षये।
तत स हनुमान्वीरो राघवप्रियकाम्यया।
सीतामाश्वासयामास पुनश्चैवमथाब्रवीत्।
(37 13[ab]) क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृत। [5]
(37 14[cd]) कस्तस्य सृजतो बाणान्स्थातुमुत्सहतेऽग्रत।
(37 15) {तथार्कमपि पर्जन्यमपि वैवस्वत यमम्।
{रणे योधयितु शक्तस्तव हेतोर्विलासिनि।
(37 16) {स हि सागरपर्यन्ता महीं शासितुमर्हति।
{त्वन्निमित्तो हि रामस्य जयो जनकनन्दिनि। [10]
(37 50) {स हि मर्मसु मर्मेषु ताडितो मन्मथेषुणा।
{न शर्म लभते राम सिंहार्दित इव द्विप।
मा देवि शोचमाना हि त्यज शोकमनिन्दिते।
विष्णुना श्रीरिवेन्द्रेण भर्त्रा नाथवती सती।
यस्या नाथस्तवार्यायाः राक्षसान्तकरः प्रभुः। [15]
अचिरेणैव कालेन स्वामितो नेष्यते बलात्।
ब्रुवन्तमेव मधुर हनूमन्त प्लवगमम्।

[(1 1) B3 त्वया (sic) (for तव) —(1 2) B3 मम चाक्षये, B4 वदत कपे (for मन्वाक्षये) —(1 3) B2 ततो हनुमान्वीरोपि (for the prior half) —(1 4) V1 B1 D6 पुनश्चैनाम्, V2 स पुनस्ताम्, B1 निपुणस्ताम (for पुनश्चैवम्) B4 [ए]व तथा (for [ए]वमथ) —(1 5) B4 -प्रवीर् (for प्रवरैर्) Ñ2 D6 युत —(1 6) Ñ2 D6 युतो (for सृजतो) —(1 7) B3 तथोग्रम्, B4 स चार्कम् (for तथार्कम्) —(1 10) V1 B1 त्वन्निमित्ते D6 om हि (subm) —(1 11) B3 कर्मसु (for मर्मसु) B4 मन्नाग्निना, D6 मन्मथाग्निना —(1 13) Ñ2 V1 B1 2 4 D6 शोचमानार्ह V2 कुरु (for त्यज) —(1 14) B1 (m also as above) 3 4 श्रीमता (for विष्णुना) B4 विचित्रेण (for इवेन्द्रेण) Ñ2 V1 D6 शची (for सती) —(1 15) B4 रामस् (for नाथस्) B1 तवामोघो B3 पश्य नाथस्तवार्याया (for the prior half) —(1 16) B3 पुरीं, B4 बल (for बलात्) —(1 17) D6 कृताजलि (for प्लवगमम्)]

23 D11 om 23 (cf v l 18) G3 damaged up to इम च in [a] (cf v l 22) Before 23, Ñ2 V B D6 read 20[cdef] (including 897* and 898*) —[a]) Ś1 D5 7 9 T1 2 M1 2 Cr इद, Cg as in text (for इम) D1 सु- (for च) D8 M1 शोक, G3 शीघ्र (for तीव्रं) D8 M1 तीव्र- (for शोक-) —[b]) Ñ2 D6 रक्षोगणाना, V B °गणांश्चै (for रक्षोभिरेभि) Ñ1 B3 परिभर्त्स्यमान, G1 परितर्जन च —[c]) S1 Ñ2 V B D4 6 10 ब्रूयाश्च, G1 ब्रूयात्तु —G3 damaged from वीर in [d] up to कृता in 24[b] —[d]) Ś1 D10 पथा शिवस्तेस्तु (for शिवश्च तेऽध्वास्तु) Ñ2 V1 B D6 शिवश्च पथास्तव नित्यमस्तु ❀ Cr शिवश्च तेऽध्वास्तु हरिप्रवीर इति पाठ ❀ —For 23, D3 subst

902* इद च तीव्र दु ख प्रदय रक्षोभिश्चानिभर्त्सनम्।
रामान्तिके त्व ब्रूया पन्थाश्चैव शिवोऽस्तु ते।

[The prior halves of 1 1 and 2 are hypm and subm respy]

—Thereafter D3 cont, while D1 ins after 23

903* एतावदुक्त्वा वचन बाष्पसदिग्धया गिरा।
अपारयन्ती व्याहर्तुं हस्तेन विससर्ज तम्।

—After 23, V B1 2 ins, Ś1 ins after 16 (owing to omission), Ñ1 D2 10 ins after 18, whereas Ñ2 B2 4 D6 ins before 24

G 5 37 27
B 5 40 25
L 5 37 27

स राजपुत्र्या प्रतिवेदितार्थः ।
कृपिः कृतार्थः परिहृष्टचेताः
तदल्पशेषं प्रसमीक्ष्य कार्यं
दिशं ह्युदीचीं मनसा जगाम ॥ २४

इति श्रीरामायणे सुन्दरकाण्डे अष्टात्रिंशः सर्गः ॥ ३८ ॥

३९

स च वाग्मिः प्रशस्ताभिर्गभिष्यन्पूजितस्तया ।
तस्मादेशादपक्रम्य चिन्तयामास वानरः ॥ १
अल्पशेषमिदं कार्यं दृष्टेयमसितेक्षणा ।
त्रीनुपायानतिक्रम्य चतुर्थ इह दृश्यते ॥ २
न साम रक्षःसु गुणाय कल्पते
न दानमर्थोपचितेषु वर्तते ।
न भेदसाध्या बलदर्पिता जनाः
पराक्रमस्त्वेष ममेह रोचते ॥ ३

904* एवमुक्तस्तु वदेह्या हनूमान्मारुतात्मज ।
पादाभिवन्दन चक्रे विनीत कपिकुञ्जर ।

[(1 1) Ñ1 [s]थ, D2 स (for तु) V2 इति मुक्तस्तु (for एवमुक्तस्तु) D10 एवमुक्त्वा वदेही (sic) (for the prior half) Ś1 Ñ1 D2 हनुमान् वैदेह्या —(1 2) Ñ1 V2 B1 D2 पादाभिवान्दन Ś1 Ñ B1 4 D2 6 10 हरिपुगव (for कपिकुञ्जर)]

24 D11 om up to कपि in ^{b} (cf v l 18) G1 damaged up to कृता in ^{b} (cf v l 23) Ñ2 B1 4 D6 read 24 (preceded by 904*) before 5 39 1 —^{a}) B3 G1 प्रतिपादितार्थ, D4 विनिवेदितार्थ —^{b}) D6 प्रति- (for परि-) Ś1 Ñ1 D1 3 10 11 (हD3 -नु)ष्टभाव, D2 हृष्यमाण, D4 हृष्टमानस (for -हृष्टचेता) Ñ2 V B1 3 4 D6 कपिप्रवीर परि(V °र प्र [sic], B3 °रश्च प्र)हृष्टमानस, B2 कपि प्रवीर प्रतिहृष्टमानस —^{c}) B4 तदन्य-, D2 तदाल्प, M3 Cr m g अल्पाव, Ct as in text (for तदल्प) Ñ2 V B D6 समुदीक्ष्य (for प्रसमीक्ष्य) —^{d}) Ñ V B D2 3 6 11 आ(Ñ1 दि)शामुदीचीं

Colophon V B1 2 om (cont the Sarga) —*Sarga name* Ś1 D2 4 10 अभिज्ञानदर्शन(D4 °न), Ñ1 अभिज्ञानप्रदान, Ñ2 B3 D6 सीतावाक्य, B4 अभिज्ञान-दान, D1 11 अभिज्ञानवर्णन, D3 सीताभिज्ञाननिवेदन —*Sarga no* (figures, words or both) Ś1 Ñ1 D1 2 4 10 11 om, Ñ2 D6 37, B3 35, B4 M2 39, D3 42, D5 7-9 T G M1 3 40 —After colophon, G concludes with श्रीरामाय नम

39

V B1 2 continue the previous Sarga M2 begins with श्रीरामाय नम

1 Before 1, Ñ2 B1 4 D6 read 5 38 24 (preceded by 904*) —^{a}) Ś1 D4 10 वाणिभि, Cg k as in text (for च वाग्मि) Ñ V B D1-3 6 11 स वाग्मि सु (Ñ1 D1 2 11 °णिभि)प्रसन्नाभिर् —^{b}) Ñ1 कपि (for तया) Ñ2 V B D6 प्रतिपूजित (for पूजितस्तया) —^{c}) D7 G1 Ct अपाक्रम्य (for अप°) Ś1 Ñ1 D1 3 4 10 वद्य(Ñ1 D3 नत्वा) सीतामप(Ś1 °ति, D10 °भि)क्रातश्, Ñ2 V B D6 वंदित्वा तामति(B1 before corr °प, B4 °नु)क्रम्य, D2 11 ता वदयित्वा प्रकातं(D11 बलवान्) —^{d}) S1 D4 10 वीर्यवान्, T मारुति (for वानरः)

[Cf Pañcatantra 2 148 Ś1 D10 नाग्नौ, G1 अग्ने (for नाग्ने) G2 तु (for स) Ñ2 V B D6 हरिपुगव, D1 4 11 वपि° (for हरियूथप)]

—Ś1 Ñ V B D2 3 6 10 G1 2 cont, while D7-9 G3 M3 Cg t ins after 13

1086* न हनूमद्विशस्ताना राक्षसाना वसुधरा ।

[Ś1 D10 हनूमता, D3 न मारुति-, M3 Cg नाग्निर्नापि (for न हनूमद्) Ś1 Ñ2 V B D2 6 10 -निरस्तानां (for -विश°)] —Thereafter, Ś1 Ñ V B D2 6 (Ñ2 V B1-3 D6 1 1-14) 10 ins, while D1 4 11 ins after 1085* a long passage relegated to App I (No 12), whereas after 1086*, D7 8 (l 1-12 only) 9 G M3 ins a long passage relegated to App I (No 13) —After 1086*, D3 further cont.

1087* विमानेभ्य प्रदीप्तेभ्यो दह्यमाना वराङ्गना ।
त्यक्ताभरणसयोगा भयार्ता विप्रदुद्रुवु ।
मुक्तोत्तरीया सभ्रान्ता दृश्यमानपयोधरा ।
विकीर्णकेश्यो वेपन्त्यो धूमावृतविलोचना ।
हा नाथ हा कान्त इति ब्रुवन्त्य शोकर्कर्षिता [5]
धावन्ति तत्र तत्रैव मृग्यो दावार्दिता यथा ।

—Thereafter D3 cont 1 2-16 (repeting 1 2 here) of 1082*

—After 13, D5 T1 2 (l 3-12 only) 3 M1 2 ins a long passage relegated to App I (No 13)

14 For sequence in B3, cf v l 1 Ñ1 D11 repeat 14 after 16, while D8 T2 repeat 14 after App I (No 13) —^{a}) D1 2 4 11 (first time) हुताशनेनाथ (for हुताशनज्वाल) Ñ1 (both times) -समाकुला D11 (second time) °धूता (for °वृता) Ñ2 V B D6 हुताशनार्चि परिवेष्टिता सा (Ñ2 D6 °तागा) —^{b}) Ś1 Ñ1 (both times) 2 V B D2 3 6 10 11 (first time) परमार्तयोधा, D1 4 11 (second time) प्रमदोत्तमा यथा, D8 (first time) हतसर्वशोभना T2 (first time) परमार्तरूपा, G3 परिवृत्तयोधा, M2 परिरुग्धयोधा Cm g t as in text (for परिवृत्तयोधा) —^{c}) Ś1 हनूमता Ś1 Ñ1 (second time) B4 D1-4 10 11 (both times) T2 (first time) G1 2 कोप (for क्रोध) T3 -[अ]भिधाना (for °भूता). —^{d}) Ś1 Ñ1 B1 D1 2 4 10 11 T2 (Ñ1 D8 T2 first time, D11 second time) काल-, V2 कोप-, B3 पाद, T1 3 शोक- (for शाप-) —After 14 (first occurrence), T2 ins l 13-44 of App I (No 13)

15 V2 B1 2 om 15 Ś1 Ñ B4 D1-4 6 10 11 read 15 after 17 V1 transp 15 and 16 B3 reads st. 17 (17^{ab} subst) and 15 after 5 51 36 —^{a}) D5 T1 3 G1 3 समभ्रमस्तत्र, D8 T2 G2 M समभ्रमत्रस्त- (for समभ्रम त्रस्त-) D8 -विन्नस्त- (for -विषण्ण-) D5 7 9 रक्षमा Ś1 Ñ D1 2 4 6 10 स ता भयत्रा (D1 4 6 °योद्भा)-तनिशाचराकुला, V1 B3 4 तत समुद्रात (B4 स ता भ्रात)-निशाचराकुला, D3 स तत्र सभ्रातनिशाचराकुल D11 स तां भयात्रस्तनिशाचराकुला —^{b}) V1 पुरीं समुज्वाल- (for समुज्वलज्ज्वाल) Ñ2 D6 हुताशदेहिता, D3 सहस्रमालिनीं (for हुताशनाङ्किताम्) —^{c}) Ś1 Ñ1 B1 D1-4 10 11 महायशा, Ñ2 D6 विहायसा V1 B3 मनोजसा, T3 Cg^{p} महात्मा, G1 °बल (for महामना) ❀ Cv हनुमान्महामना इति सम्यक् । अन्यथा पादस्याक्षरन्यूनत्वाच्छन्द साङ्कर्यप्रसङ्ग

G 5 50 21
B 5 51 44
L 5 50 33

स राक्षसांस्तान्सुबहूंश्च हत्वा
वनं च भङ्क्त्वा बहुपादपं तत् ।
विसृज्य रक्षोभवनेषु चाग्निं
जगाम रामं मनसा महात्मा ॥ १६

लङ्कां समस्तां संदीप्य लाङ्गूलाग्निं महाकपिः ।
निर्वापयामास तदा समुद्रे हरिसत्तमः ॥ १७

इति श्रीरामायणे सुन्दरकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

स्यात्। विषमवृत्तमिति केचित्। Cg हनुमान्महामना इति पाठ। हनुमान्महात्मेति पाठे विषमवृत्त वा ❀—T1 damaged for 15^{d} —^{d}) D7 9 T3 G1 Ck t स्वयंभुरोषो(G1 °षा)पहताम्, D8 स्वयंभुव कोप°, Cg is in text (for स्वयंभुरोषोप°) Ñ2 V1 B3 4 D6 11 क्षिति (for [अ] वनिम्) Ś1 Ñ1 D1-4 10 स्वयंभुव कोपहतामिव क्षितिं(D1 °वैक्षत) —After 15, D5 T G M2 ° ins, D7 9 M1 ins l 1-4 after 15 and l 5-8 after l 10 of 1089*, while D8 ins after 14 (r)

1088* भङ्क्त्वा वन पादपरत्नसङ्कुल
हत्वा तु रक्षांसि महान्ति संयुगे ।
दग्ध्वा पुरीं तां गृहरत्नमालिनीं
तस्थौ हनूमान्पवनात्मज कपि ।
गृहाग्र्यशृङ्गाग्रतले विचित्रे [5]
प्रतिष्ठितो वानरराजसिंह ।
प्रदीप्तलाङ्गूलकृतार्चिमाली
व्यराजतादित्य इवांशुमाली ।

[(l 3) T2 हर्म्य- (for -रत्न) —D5 T2 M2 om. l 5-8 D8 ins l 5-8 for the first time after 15, repeating them here —(l 5) T1 3 G2 M2 त्रिकूट-, G1 गृहाद्रि- (for गृहाग्र्य) —(l 8) G3 प्रकाशद् (for व्यराजत) D7 8(both times) 9 [अ]र्चिमाली (for [अ]शु°) —After l 8 (first occurrence), D8 ins l 13-44 of App I (No 13)]
—Thereafter T1 3 G2 cont 1089*, G1 cont l 1-4 of 1089*.

16 For sequence in B3, cf v l 1 T1 3 G2 om 16 V1 transp 15 and 16 —^{a}) V रक्षोगणान् (for स राक्षसान्) Ś1 Ñ1 V2 B1 2 4 D1-4 6 10 11 निहत्य, V1 B2 निहत्वा (for च हत्वा) —^{b}) V2 वल (for वन) Ñ1 D5 11 तत, D1 2 4 च तत् (for तत्) Ñ2 V B1-3 D6 महच्चैत्यवत, D8 बहुपादपाद्य (for बहुपादप तत्) —^{c}) B2 -भव ° हुताग्नि, B4 D8 -भवनेषु वह्नि(D8 चाग्निर्), G1 -भवनेषि चाग्नि (for -भवनेषु चाग्नि). G3 विनिद्य रक्षोहृदय- प्रकृप —^{d}) Ñ2 V B D6 सीता (for राम) Ñ1 महाकपि (for महात्मा) —After 16, N1 D11 repeat 14, while B3 ins a long passage relegated to App. I (No 14)
—After 16, D5 7-9 M2 Ct ins, T1 3 G2 cont after 1088*, I2 ins l 9-10 after 10 and cont l 11-12 and l 1-8 after 109-* and G1 ins l 9-10 after 16 and cont l 1-4 after 1088*, l 11-12 and l 5-8 after 1091*, G3 M3 ins l 1-4 and l. 9-10 after 16 and ins l 11-12 and l 5-8 after 17(M3 preceded by 1091*), M1 ins l 1-10 after 16 and cont l 11-12 after 1091* .

1089* ततस्तु त वानरवीरमुख्य
महाबल मारुततुल्यवेगम् ।
महामति वायुसुत वरिष्ठ
प्रनृत्तुर्वानरगणाश्च सर्वे ।
देवाश्च सर्वे मुनिपुंगवाश्च [5]
गन्धर्वविद्याधरकिंनराश्च ।
भूतानि सर्वाणि महान्ति तत्र
जग्मु परा प्रीतिमतुल्यरूपाम् ।
भङ्क्त्वा वन महातेजा हत्वा रक्षांसि संयुगे ।
दग्ध्वा लङ्कापुरीं भीमां रराज स महाकपि । [10]
तं दृष्ट्वा वानरश्रेष्ठ हनूमन्त महाकपिम् ।
कालाग्निमिव सञ्चिन्त्य सर्वभूतानि तत्रसु ।

[D5 reads l 1-4 in marg T1 damaged up to महाबल in l 2 —(l 1) T2 तदद्भुत (for ततस्तु त) G1 2 वानरराज, G3 °यूथ- (for °वीर-) —(l 6) D7-9 -पन्नगाश्च, M3 -नागयक्षा (for किंनराश्च) —(l 7) M2 transp भूतानि and सर्वाणि —After l 8, D5 8 T1 3 G2 M2 3(after l 10) Cg read colophon ❀ Cg अस्मिन्सर्गे एकपञ्चाशच्छ्लोका । ततो महात्मेत्त श्लोक स राक्षसानिति श्लोकोक्तावेकतया बहुकोशेषदर्शनाच्च प्रक्षिप्त । बहुकोशेष्वेतत्सर्गसमाप्तिविपर्यय उत्तरसर्गारम्भविपर्ययश्च दृश्यते ❀—(l 9) T2 G3 हत्वा राक्षसपुंगवान् (for the post half) —(l 10) D5 9 T3 लङ्का (for लङ्का-) D8 सर्वा, T1 3 M3 रम्या (for भीमा) ❀ Cv अत्र सर्गे 'भङ्क्त्वा वन महातेजा" इत्यादिरुपरिसर्गारम्भ । अन्यस्तु देवकल्पमादृश्य कलह ', Cr (Venk ed) रराज स महाकपिरित्यत्र परमुत्तरसर्गाभिमूतो "लङ्का समस्ता संदीप्य" इत्यय श्लोक केषुचित्कोशेषु प्रमादाल्लिखित ❀—After l 10, D7 9 M1 ins l 5-8 of 1088* —D7 9 G2 om l 11-12 —(l 11) M1 महाद्युतिं (for °कपिम्) —(l. 12) I1 3 M1 3 कालाग्निरिति D5 महा- (for सत्र-)]

17 For sequence in B3, cf v l 15. V B1.2 om. 17 T1 damaged for 17^{ab}. —^{a}) D7 9 संपीड्य (for

५३

संदीप्यमानां विध्वस्ता त्रस्तरक्षोगणां पुरीम् ।
अवेक्ष्य हनुमॅल्लङ्कां चिन्तयामास वानरः ॥ १
तस्याभूत्सुमहांस्त्रासः कृत्वा चात्मन्यजायत ।
लङ्कां प्रदहता कर्म किंस्वित्कृतमिदं मया ॥ २

धन्यास्ते पुरुषश्रेष्ठा ये बुद्ध्या कोपमुत्थितम् ।
निरुन्धन्ति महात्मानो दीप्तमग्निमिवाम्भसा ॥ ३
यदि दग्ध्वा त्विमं लङ्कां नृनमार्यापि जानकी ।
दग्धा तेन मया भर्तुर्हतं कार्यमजानता ॥ ४

G 5 51 0
B. 5 55 8
L 5 54 4

°दीप्य) —^{b}) D8 1 3 G1 2 M3 महाबल (for °कपि) —For 17^{ab}, Ś1 Ñ B3 4 D1–4 6 10 11 subst

1090* स दीर्घं लीलयोद्वृत्य लाङ्गूलं भीमदर्शनम् ।

[Ś1 D10 [उ त्थाय, Ñ2 D6 बद्ध, B3 D3 [उ]त्सृज्य, B4 [उ]च्छ्रि य (for [उ द्वृत्य)]

—^{d}) Ś1 D7–10 T2 G3 हरिपुंगव, Ñ1 B3 D1 4 11 कपि°, D3 °यूथप (for हरिसत्तम) —After 17, Ś1 Ñ B4 D1–4 6 10 11 read 15, while D7–9 T G1 2 M1 3 ins

1091* तत्र देवा सगन्धर्वा सिद्धाश्च परमर्षय ।
दृष्ट्वा लङ्कां प्रदग्धां तां विस्मयं परमं गता ।

[(1 1) D7–9 ततो (for तत्र) —(1 2) D8 प्रदीप्तां (for °दग्धां) M1 दृष्ट्वा दग्धां पुरीं लंकां (for the prior half) G1 परमागता]

—Thereafter, T2 cont 1 11–12 and 1 1–8, G1 cont 1 11–12 and 1 5–8, M1 cont 1 11–12 of 1089*

—After 17, G3 M3 (preceded by 1091*) ins 1 11–12 and 1 5–8 of 1089*.

Colophon V2 B3 om, while D5 8 T1 3 G2 M2 3 (after 1 10) read colophon after 1 8 of 1089*. —*Sarga name* Ś1 Ñ1 B1 D2 11 लंकादीपन, Ñ2 V1 B1 2 D6 लंकादाह, D1 3 4 लंकाप्रदीपन, D10 लांगूले हनूमंत लंकादीपन — *Sarga no* (figures, words or both) N1 B2 D1 2 4 10 11 om, Ś1 53, Ñ2 V1 D6 52, B1 50, B4 55, D3 56, D5 7–9 S 54 —After colophon, G M1 2 conclude with श्रीरामाय नम —After Sarga 52, Ś1 Ñ1 D1–4 10 11 ins a long passage relegated to App I (No 14)

53

V2 B3 continues the previous Sarga

1 ^{a}) V2 B1–3 D2 6 11 M1 2 स दीप्यमाना, Ck t सदीप्य° (as in text) D2 विध्वस्ता (for विध्वस्ता) —^{b}) M1 त्रस्तो (for त्रस्त) D3 गणाकुला (for -गणा पुरीम्) —T1 damaged for 1^{cd} —^{c}) D6 प्रवेदय —^{d}) Ś1 Ñ V B1 2 (marg also) 3 D2 3 6 10 विक्रुव, B2 विह्वल, B4 विज्वर (for वानर) —After 1, V1 reads 5–6 (including star passage), while B2 4 read 5^{ab} only, all repeating 5^{ab} in its proper place

2 Ñ2 V2 B1 3 D6 om 2–4 —^{a}) Ś1 Ñ1 B2 4 D1 2 4 10 11 G2 M1 [आ]सीत्, V1 [अ]य (for [अ]भूत) D3 हनुमतस्त्राम —^{b}) Ñ1 चैव हि, D1 4 11 चैव वि- (for चात्मनि) V1 B4 कृच्छ्रादेव व्यजायत, B2 कृत्यादेवाविजानत —^{c}) Ñ1 किंचित्, D5 7–9 काम, Cr m k t as in text (for कर्म) —^{d}) Ś1 B2 D° 10 11 किंचित्, D2 कि धिक्, D5 क्वचित् (for किंस्वित्) Ñ1 कृत कर्म मया इद (with hiatus)

3 Ñ2 V2 B1 3 D6 om 3 (cf v l 2) —^{a}) D1 4 पुरया, T2 वानर- (for पुरुष-) D7–9 धन्या खलु महात्मानो —^{b}) B2 4 क्रोधमुत्थित, D3 क्रोधमूर्जित D1 11 कोप (D11 क्रोध)मूर्छित (for कोपमुत्थितम्) —^{c}) D8 निरुध्यति, T1 2 निरुधते B2 प्रदीप्तमनुलुपति ❀ Cm t दु खातिशयादेव महात्मपदपौनरुक्त्य न दोषाय ❀ —^{d}) V1 D1 [अं]भसि (for [अ]म्भसा) —After 3, D5 7–9 S ins

1092* क्रुद्धः पापं न कुर्यात्क्रुद्धो हन्याद्गुरूनपि ।
क्रुद्ध परुषया वाचा नरः साधूनधिक्षिपेत् ।
वाच्यावाच्यं प्रकुपितो न विजानाति कर्हिचित् ।
नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते क्वचित् ।
यं मु पतित क्रोध क्षमयैव निरस्यति । [5]
यथोरगस्त्वचं जीर्णां स व पुरुष उच्यते ।
धिगस्तु मां सदुर्बुद्धिं निर्लज्जं पापकृत्तमम् ।
अचिन्तयित्वा तां सीतामग्निं स्वामिघातकम् ।

[T1 damaged for 1 1 —(1 1) G3 Cmp k tp य (for क) —(1 2) T2 अपि (for अधि) —(1 3) D8 वाचा (for वाच्य) G3 न हि (for न वि-) —(1 4) D5 T2 G3 कार्यम, Ck t as above (for [अ]कार्य°) D7 9 T2 वाच्य, G3 चाथ (for [अ]वाच्य) —(1 5) D5 T2 G1 2 M1 कोप (for क्रोध) —T1 damaged for 1 6 —(1 7) T2 G1 3 धिक्कामनार्यं दुर्बुद्धिं (for the prior half)]

4 Ñ2 V2 B1 3 D6 om 4 (cf v l 2) D1 3 4 om 4–5^b —^{a}) Ñ1 V1 B2 4 D2 M2 मया, D11 om (for त्विय) D7–9 C1 सर्वा (for लङ्का) Ś1 D10 परिदग्धा पुरी लंका —^{b}) B2 नृपभार्या, B4 नृन भार्या, D8 °मेधा (for नूनमार्या) D10 मैथिली (for जानकी) —D5 reads 4^{cd} in marg —^{c}) T2 दग्ध Ś1 D10 मया तथा (for तेन

G 5 51 2
B 5 55 9
L 5 52 5

यदर्थमयमारम्भस्तत्कार्यमवसादितम् ।
मया हि दहता लङ्कां न सीता परिरक्षिता ॥ ५
ईषत्कार्यमिदं कार्यं कृतमासीन्न संशयः ।
तस्य क्रोधाभिभूतेन मया मूलक्षयः कृतः ॥ ६
विनष्टा जानकी व्यक्तं न ह्यदग्धः प्रदृश्यते ।
लङ्कायाः कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥ ७
यदि तद्विहतं कार्यं मया प्रज्ञाविपर्ययात् ।
इहैव प्राणसंन्यासो ममापि ह्यतिरोचते ॥ ८
किमग्नौ निपताम्यद्य आहोस्विद्वडवामुखे ।
शरीरमाहो सत्त्वानां दद्मि सागरवासिनाम् ॥ ९
कथं हि जीवता शक्यो मया द्रष्टुं हरीश्वरः ।
तौ वा पुरुषशार्दूलौ कार्यसर्वस्वघातिना ॥ १०
मया खलु तदेवेदं रोषदोषात्प्रदर्शितम् ।
प्रथितं त्रिषु लोकेषु कपित्वमनवस्थितम् ॥ ११

मया) B2 हत (for भर्तुर्) —^{d}) Ñ1 हतु, B2 कृत, B4 हित-, D2 हत, T1 3 G1 2 हित, G3 हता (sic), Cm t as in text (for हत) T1 damaged from कार्यं up to 5^{b}

5 D1 3 4 om 5^{ab}, T1 damaged up to 5^{b} (for both cf v l 4) V1 reads 5-6 after 1 repeating 5^{ab} here B2 4 read 5^{ab} after 1 repeating it here —^{a}) B3 यदश्रयोयम् V2 आरब्धस् (for आरम्भस्) —^{b}) D11 सर्वम् (for कार्यम्) Ś1 D10 तत्कार्यमफल कृत, V1 B2 4 (all second time) तत्कार्यमिह नाशित —B2 om 5^{c}-6 —^{c}) Ñ2 V B1 3 4 D6 [इ]ह, D11 [अ]पि (for हि) D1 4 यदि दग्धा मया लङ्का D3 यदि लङ्का मया दग्धा —^{d}) T1 3 transp न and सीता

6 V1 reads 5-6 (including star passage) after 1 B2 om 6 (cf v l 5) —^{a}) Ś1 D10 ईषत्कृतम, Ñ1 °त्कर्म, Ñ2 V2 अन्यशेषम, V1 B1 3 4 D6 अल्पशेषम, D1 2 4 11 Ck ईषत्करम् (for °त्कार्यम्) —Ś1 om (hapl) 6^{b}-8^{a} —^{b}) Ñ1 D1-4 10 आसीत्पूर्वं (for कृतमासीन्) D11 मया प्रज्ञाविपर्ययात् (=8^{b}) —^{c}) D3 6 अस्य, D10 तेन (for तस्य) —^{d}) D3 माया (for मया) Ñ1 मूलमय, T2 °क्षति, Cv as in text (for °क्षय) T2 कृता —For 6^{cd}, Ñ2 V B1 2 4 D6 11 subst

1093* तन्मे कोपपरीतेन समूलमिह नाशितम् ।

[B3 मया (for तन्मे) V2 तस्मात्कोपपरीत म (for the prior half)]

7 Ś1 om 7 (cf v l 6) —^{a}) D10 T1 3 M3 नून (for व्यक्त) —^{b}) Ñ1 प्रकाशते, D11 प्रदृश्यते (for प्रदृश्यते) D2 न ह्यदग्धा प्रकाशते —^{c}) D6 Γ M2 3 लकाया B3 क्वचिद् (for कश्चिद्) D10 लङ्का चैव हि दुर्धर्षा —T1 damaged for 7^{d}-8^{b} —^{d}) B4 सर्वं, D10 मया (for सर्वा) B3 D1 4 T2 मया (for पुरी)

8 Ś1 om 8^{a} (cf v l 6) T1 damaged for 8^{ab} (cf v l 7) —^{a}) D10 यदीह Ñ1 D5 10 T2 G विहित (for विहत) Ñ2 V B D3 6 11 तदेव विहि(Ñ2 V1 B4 °हं, D6 °हि, D11 च ह)ते कार्ये, D1 4 यद्विद गर्हित कर्म, D2 तदेव विहत कार्यं —^{b}) Ñ V B D2 6 T3 M मम (for मया) D11 मन प्रज्ञाविपर्यय —^{c}) D3 देह- (for प्राण). Ś1 D10 निन्यासो, Ñ1 -सत्यागो, Ñ2 V1 B D6 -सन्यासम् (for -सन्यासो). —^{d}) D1.4 11 मया (for मम) Ś1 D10 G1 M1 2 [अ]भि-, V2 D7-9 M3 [अ]द्य, D11 [अ पि, G3 तु (for [अ]पि) Ñ2 V1 B D6 अहमप्यभि(D6 °धि)रोचये, D2 5 ममैव ह्यधि(D5 मम चाप्यभि)रोचते, D3 मम सप्रति युज्यते ❀ Cr मम चापीत्यत्र निपातसमुदाय कार्यविहतिसमुच्चयपर ❀

9 ^{a}) Ś1 D10 न पतास्याग्नु, Ñ2 V B1-3 D6 11 प्र(D11 नि)क्षिपे दे(B1 2 °हे)हम्, B4 निपतिष्यामि, D3 नि क्षिपाम्येतद्, D4 (after corr *sup lin*) निपतोन्यत्र; D8 °ताम्यत्र, T2 °तिष्येद्य, G1 3 °तिष्ये वा (for निपताम्यद्य) M1 क्षिमत्र न पतास्यग्नौ —Note hiatus between ^{a} and ^{b} —^{b}) Ñ2 V B1-3 D6 अथवा, D1-4 11 अहो स्विद्, M1 वाहो° (for आहो°). B3 वडवानले —^{c}) Ñ2 V B2 D6 उत, B1 3 वत, T1 G1 2 इह (for आहो) T2 अह शरीर सत्त्वाना —^{d}) Ñ2 V B1-3 D6 ददाम्य(B1 °द्याम)र्णववासि(Ñ2 V2 °शासि, V1 °शायि)ना —For 9^{cd}, Ś1 Ñ1 B4 D1-4 10 11 subst.

1094* शरीर वापि सत्त्वेभ्यो दद्मि मकरालये ।

[D1 2 11 च (for वा) Ñ1 भूतेभ्यो (for सत्त्वेभ्यो) D3 दरुणालये]

10 ^{a}) B4 D7 9 T1 2 G2 नु, D5 स-, D8 स (for हि) D1 3 G1 M1 जीविता D11 शक्य (for शक्यो) —^{b}) Ñ1 V B4 D1-4 11 कपीश्वर (D11 °र) —D4 om 10^{d}-11^{a} —^{d}) B4 सर्वकार्यविघातिना

11 D4 om 11^{a} (cf v l 10) —^{a}) Ñ2 V B1-3 D6 तदेवेद खलु मया —^{b}) T3 रोष (for रोष) Ñ V B D2 3 11 प्रकाशित, D6 प्रणाशित (for प्रदर्शितम्) Ś1 D1 10 रोषावेशा(D1 °मर्षा)त्प्रकाशित, D4 सर्वमेतत्प्रकाशित —^{c}) Ś1 D10 प्रश्रुत, Ñ2 V B D6 विस्पष्ट (for प्रथितं) —^{d}) V2 B1 2 (m also as in text)कार्यं यद् (for कपित्वम्) V1 B3 यदवस्थित (for अन°) —After 11, B4 reads 12^{cd} for the first time repeating it in its proper place

Arya Research Team

धिगस्तु राजसं भावमनीशमनवस्थितम् ।
ईश्वरेणापि यद्रागान्मया सीता न रक्षिता ॥ १२
विनष्टायां तु सीतायां तावुभौ विनशिष्यतः ।
तयोर्विनाशे सुग्रीवः सबन्धुर्विनशिष्यति ॥ १३
एतदेव वचः श्रुत्वा भरतो भ्रातृवत्सलः ।
धर्मात्मा सहशत्रुघ्नः कथं शक्ष्यति जीवितुम् ॥ १४
इक्ष्वाकुवंशे धर्मिष्ठे गते नाशमसंशयम् ।
भविष्यन्ति प्रजाः सर्वाः शोकसंतापपीडिताः ॥ १५
तदहं भाग्यरहितो लुप्तधर्मार्थसंग्रहः ।
रोषदोषपरीतात्मा व्यक्तं लोकविनाशनः ॥ १६

इति चिन्तयतस्तस्य निमित्तान्युपपेदिरे ।
पूर्वमप्युपलब्धानि साक्षात्पुनरचिन्तयत् ॥ १७
अथवा चारुसर्वाङ्गी रक्षिता स्वेन तेजसा ।
न नशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते ॥ १८
न हि धर्मात्मनस्तस्य भार्यामिततेजसः ।
स्वचारित्राभिगुप्तां तां स्प्रष्टुमर्हति पावकः ॥ १९
नूनं रामप्रभावेन वैदेह्याः सुकृतेन च ।
यन्मां दहनकर्मायं नादहद्धव्यवाहनः ॥ २०
त्रयाणां भरतादीनां भ्रातॄणां देवता च या ।
रामस्य च मनःकान्ता सा कथं विनशिष्यति ॥ २१

G 5 51 19
B 5 55 25
L 5 52 21

---

12 B3 D2 om 12 D1 4 T3 G2 om (hapl) 12^{ab} Ś1 Ñ1 D10 transp ^{ab} and ^{cd} —^{a}) Ñ2 रामसभावम्, D6 रामसद्भावम् (for राजसं भावम्) —^{b}) V2 अनीशत्वमवस्थित ❀ Cv अनीशशब्दस्य वृत्तभङ्गपरिहाराय दीर्घ इति केचित् ❀ —B4 repeats 12^{cd} here (cf v l 11) —^{c}) Ñ2 V1 B1 2 D6 [ए]व (for [अ]पि) Ś1 Ñ1 D1 4 10 M1 यद्रोषान्, D11 तद्रागान्, G2 यन्मोहान् (for यद्रागान्) B4 (first time) ईदृशेनापि यद्रोषान्, B4 (second time) ईदृशेन च यद्रागान —^{d}) D6 om न (subm) T1 न परि- (for सीता न)

13 D4 om 13^{abc} —^{a}) Ś1 om (subm), Ñ1 न, Ñ2 V B1-3 D6 हि (for तु) S1 Ñ1 D1-3 10 11 वैदेह्या (for सीतायाः) —^{b}) D3 न भविष्यत (for विनशिष्यत) Ñ2 V B D6 तौ द्वावपि विनङ्क्ष्यत (V2 °लङ्क्ष्यते) —^{c}) Ñ1 तथा (for तयोर्) S1 Ñ V B D1-3 6 10 11 विनाशात् —^{d}) Ñ2 V B D6 न भविष्यति D4 विनशिष्यते, D10 विनिशिष्यति (sic) D3 मानुषवधो विनङ्क्ष्यति

14 ^{a}) Ñ2 V1 B D6 तत (for एतद्) Ś1 Ñ V B1 2 4 D1-4 6 10 11 एवमिषं, B3 एव वच (for एव वच) —^{c}) Ñ1 धर्मज्ञ Ñ2 V B D3 6 स च, D1 4 11 स हि (for सह-) —^{d}) Ś1 शक्नोति, D11 शक्यति (for शक्यति) Ñ2 V2 B D6 नियत न भविष्यति, V1 न भविष्यति सर्वथा, D1 4 सोपि लक्ष्य (D4 °ज)ति जीवित

15 ^{a}) Ś1 Ñ1 धर्मज्ञो (sic), Ñ2 V B D6 सनष्टे, D1 3 4 10 11 धर्मज्ञे, D2 नष्टेथ (for धर्मिष्ठे) —^{b}) Ś1 D10 11 न संशय, Ñ1 D7-9 T2 G1 असंशय N2 V B D6 को धर्म (N2 B1 2 °र्मं)परिरक्षिता, D1 2 तद्व (D2 तर्ध)र्मपरिपालिता, D4 गतो नात्र संशय —After 15^{ab}, B4 ins

1095* विनष्टायां तु सीतायामनर्था भविता महान् ।

—^{c}) Ś1 D2 10 11 नशिष्यति, B2 3 भविष्यति, D3 विनङ्क्ष्यति (for भविष्यन्ति) D9 reads from जा up to ^{d} in marg Ñ2 V B D6 चैव (for सर्वा) Ñ1 D1 4 प्रजा सर्वा विन(D1 नशि, D4 भवि)ष्यति —^{d}) B1 D11 संतप्त- (for संताप-)

16 B3 om 16-17 —^{a}) D11 अय (for अह) Ś1 Ñ B1 2 4 D1-4 6 10 11 मद्भाग्यस्तु —^{b}) D8 M1 लुब्ध- (for लुप्त-) D11 -कार्यार्थ, M2 वर्मान्म- (for -वर्मार्थ) —^{c}) B2 लोभ (for रोष) Ñ2 V B1 2 4 D6 -मोह (for -रोष-) G1 missing for रीतात्मा —^{d}) Ś1 Ñ V B1 4 D1 4 6 10 11 M2 विनाशक

17 B3 om 17 (cf v l 16) Ś1 D10 om 17 —^{a}) Ñ V B1 2 4 D2 3 6 11 तमे(B2 °दे)व शो(B4 लो)कमभ्रात, D1 तमेव लोकसभ्रान, D4 तमेव लोकमप्राप्त —^{c}) D6 सर्वम् (for पूर्वम्) D6 अति- (for अपि) —^{d}) Ñ2 V B1 2 4 D6 स वै, D2 स ते (sic) (for साक्षात्) D3 स भूय पर्यचिंतयन्

18 ^{c}) Ñ V B D3 6 विनङ्क्ष्यति (for नशिष्यति) D6 G1 कल्याणि D11 न नाशयति कल्याणीं —^{d}) D2 प्रपद्यते (for प्रवर्तते)

19 D11 reads 19^{ab} twice —^{a}) T3 तां (for हि) Ś1 D10 तस्य धर्मात्मनो भार्यां, D11 (second time) सर्वात्मनो विशुद्धस्य —^{b}) D10 साध्वीम् (for भार्याम्) D1 अमिततेजसा Ś1 साध्वीं तामितितेजस, V2 भार्यां तामभितो-जस —^{c}) Ñ2 V B2 D7-9 स्वचरित्राभि, B3 4 सुचा रित्र्याति-, D1 4 सुचा°, D2 सचा°, D3 सच्च°, D5 T3 स्व च(T3 °चा)रित्राति, G3 स्वचारित्रेण (for °रित्राभि) Ś1 D10 -गुप्तस्य D11 सुचरित्राभिगुप्ताना —^{d}) B1 द्रष्टुम्, D2 द्रष्टुम् (for स्प्रष्टुम्) D10 नार्हति (for अर्हति)

20 ^{a}) D3 हत (for नून) Ś1 Ñ1 V1 B D7 9-11 रामप्रभावेण —^{b}) Ś1 D10 वैदेह्यास्तपसापि वा —^{c}) Ś1 यस्या, D3 नित्य, D9 M1 2 यन्मा (for यन्मा) Ś1 Ñ V1 B D1-3 6 10 11 -कर्मापि, G3 -कर्मासौ (for -कर्मायं) —^{d}) D3 नाधाक्षीद्, T3 न दहेद् (for नादहद्)

21 ^{a}) V B1 हृदय (for त्रयाणा) —^{b}) Ś1 Ñ1 B4

Arya Research Team

G 5 51 0
B 5 55 26
L 5 52 0

यदा दहनकर्मायं सर्वत्र प्रभुरव्ययः ।
न मे दहति लाङ्गूलं कथमार्या प्रधक्ष्यति ॥ २२
तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि ।
अपि सा निर्दहेदग्निं न तामग्निः प्रधक्ष्यति ॥ २३
स तथा चिन्तयंस्तत्र देव्या धर्मपरिग्रहम् ।
शुश्राव हनुमान्वाक्यं चारणानां महात्मनाम् ॥ २४
अहो खलु कृतं कर्म दुर्विषह्यं हनूमता ।
अग्निं विसृजताभीक्ष्णं भीमं राक्षसमज्जनि ॥ २५
दग्धेयं नगरी लङ्का साट्टप्राकारतोरणा ।
जानकी न च दग्धेति विस्मयोऽद्भुत एव नः ॥ २६

D1 2 4 10 11 देव(D11 चेद् [meta])वर्चसा, N2 V1 B1 2 D6 देवतोपमा' B2 °मा), V2 B3 देवतोपम, D2 देवतेजसा (for देवता च या) —c) D5 मनस (for च मन) S1 N1 B2-4 D1 2 4 10 11 मन त्राता —d) N2 V B1 नु(V2 B1 तु) चिन्तयति, D6 तु विचक्ष्यति (for विनशिष्यति) S1 D10 नित्य रामपरायणा, N1 B4 कथमग्नि प्रधक्ष्यति, B2 ता कथ सप्रधक्ष्यते, B3 ता कथ न प्रधक्ष्यति D1 2 4 कथ सा नाशमाप्नुयात्, D3 कथ सोत्र प्रधक्ष्यति, D11 कथ वह्नि प्रधक्ष्यति

21 a) B1 D1-4 11 T2 G M1 2 यदा, D5 यथा (for यद्वा) D4 य, D11 [अ]द्य, G1 [अ]सौ (for [अ]य) —b) N1 B4 D1-4 11 सर्वत्रा(N1 °दा)प्रतिम (N1 D1 2 4 °घ) प्रभु —c) N1 B4 D1-4 11 [अ]दहन्मम (for मे दहति) —d) G1 भविष्यति (for प्रधक्ष्यति) D11 कथ वाचा प्रचक्षते —For 22, S1 D10 subst

1096* कथ ता दहते ह्यग्निरितीव्रते स्थिताम् ।

[D10 दह्यते and -तीव्रे (for दहते and -तीव्र)], while N2 V B1-3 D6 subst for 22, N1 B4 D1-4 11 ins after 22

1097* व्रतोपवासपरमा नित्यं रामपरायणाम् ।
ता कथ धक्ष्यते वह्निरतिचीर्णां तपस्विनीम् ।

[(1 1) N1 D1 3 4 11 -निरता, V1 -नियमा, V2 -नियतां (for -परमा) D1 4 नित्य (for नित्य). —(1 2) V2 ता कथ च (hypm), D2 कथ ता (by transp) D2 यशस्विनीं (for तप°) N1 कथ ता धक्ष्यते ह्यग्नि प्रतिक्रान्ततपस्विनीं D1 4 11 कथ ता धक्ष्यति(D11 °ते) ह्यग्निरितीव्रव्रतां सतीं(D11 °प्रभावत), D3 कथ धक्ष्यति तां वह्निरतिचीर्णतपस्विनीं]
—After 22, D5 7-9 S ins

1098* पुनश्चाचिन्तयत्तत्र हनूमान्विस्मितस्तदा ।
हिरण्यनाभस्य गिरेर्जलमध्ये प्रदर्शनम् ।

[(1 1) G3 निश्चितस (for विस्मितस्) D5 हनुमान्मारुतात्मन (for the post half) —(1 2) G3 शुभ (for जल-) D9 marg, G1 -मध्ये प्रदर्शित]

23 B3 om 23 —a) S1 N1 D1-4 10 सत्यसवाच्च; D5 तस्य च क्थेन (for सत्यवा°) —Note hiatus between a and b —b) G2 (to avoid hiatus) ह्यनन्यत्वाच् —For 23ab, N2 V B1 2 4 D6 11 subst

1099* सा हि सत्याभिसवाद्या तथानन्या च भर्तरि ।

[N2 मया हि, B4 पथभि (for सत्याभि). V B2(m. also as above) -सधाना, B1 -सवाधा, D11 -सवस्य (for -सवाद्या)]

—c) D7-9 अग्नौ वि- (for अपि सा) B2 वह्नि (for अग्नि) —d) N1 D1 2 4 11 प्रधर्षयेत्, N2 V B1 2 4 D6 तु निर्दहेत्, D10 प्रधक्ष्यति (for प्रधक्ष्यति)

24 a) N1 D3 5 तद्या, B1 च ता, B4 खेद (for तथा). N2 V B2-4 D6 दीनो, B1 देवीं (for तत्र) G3 साधु चिन्तयतस्तस्य ❀ Cr चिन्तयतस्तस्य व्यत्ययाच्छ्रो। चिन्तयन्म इत्यर्थः, so also Ck ❀ —b) D1 4 धर्मं, G3 Ck साधु; Cm as in text (for धर्म-) —V2 om (haplo) from वाक्य in c up to हनुमान् in 1 1 of 1101*. —c) D1 4 शुश्रुवे (for शुश्राव). S1 भीतश्, N1 B3 D3 6 वाच, N2 V1 B1 2 4 D1 2 4 10 11 वाचश्; D7-9 तत्र (for वाक्य) —d) S1 D1 2 4 10 11 मनस्विना, N2 V1 B D6 दिवौकसा, D3 सचारिणा (for महात्मनाम्) N1 श्राव्यमाणा मनस्विनीं

25 V2 om 25 (cf v l 24) —a) D4 om खलु. —b) V1 D5 7 9 Ct दुर्विगाह, B °गाह्य, D10 च विषह्य, T1 3 M3 दुष्कर हि (for दुर्विषह्य) —c) S1 N V1 B D1-3 6 10 11 भीम, D4 om, D7-9 G2 M2 तीक्ष्ण (for [अ]भीक्ष्ण) —d) T2 3 G3 M3 -चेश्मनि (for -मज्जनि) S1 N2 V1 B D1-4 6 10 11 भीमे राक्षसमन्दिरे (D1 4 °पुगवे, D3 11 °सभ्रमे), N1 राक्षसाधिपमन्दिरे —After 25, D5 7-9 S ins

1100* प्रपलायितरक्ष स्त्रीबालवृद्धसमाकुला ।
जनकोलाहलाध्माता क्रन्दतीवाद्रिकन्दरैः ।

[(1 1) T2 प्रवलायत- (for प्रपलायित-) —(1 2) D5 G1 -ध्माता, T2 -[आ]ध्मानै, Crk as above (for -[आ]-ध्माता) T2 3 M1 3 क्रदती D8 T1 3 G2 M3 [अ]द्रिकन्दरे]

26 V2 om up to हनुमान् in 1 1 of 1101* (cf v l 24) —a) S1 D2 10 1 G2 M1 3 सर्वा, D11 लका (sic) (for लङ्का) —b) D4 साद्रि- (for साट्ट-) D11 सार्धं प्राकारतोरणा —After 26ab, B3 reads 5 51 37-39 —B3 om 26c-28 —c) S1 D2 8 10 M1 च न (by transp), B2 [इ]ति न, D1 4 तु न, D3 नैव (for न च) D3 दग्धेयम —d) T1 3 M2 [ऽ]द्भुतम् S1 D10 विस्मयोभूतमद्यान्हि न, N1 °य महानभूत्, N2 V1 B1 2 D6 °द्भुत (B1 °द्भात, B1 [m also] 2 °दार)भाषिणा, B4 °याद्भुत-

स निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ।
ऋषिभाक्यैश्च हनुमानभवत्प्रीतमानसः ॥ २७

ततः कपिः प्राप्तमनोरथार्थ-
स्तामक्षतां राजसुतां विदित्वा ।
प्रत्यक्षतस्तां पुनरेव दृष्ट्वा
प्रतिप्रयाणाय मतिं चकार ॥ २८

G 5 52 26
B 5 55 35
L 5 52 29

इति श्रीरामायणे सुन्दरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

Arya Research Team

चेतस , D1 2 4 11 °योद्भुतमेव च, D3 अहो देवगतिर्महान् —After 26, Ś1 Ñ V B2 4 D1-4 6-11 T2 ins

1101* इति श्रुत्वाव हनुमान्वाचं ताममृतोपमाम् ।
बभूव चास्य मनसो हर्षस्तत्कालसंभव ।

[V2 om up to हनुमान् in ¹ 1 —(1 1) B2 श्रुत्वा स, D1 4 11 श्रुत्वैव (for श्रुत्वाव) Ñ2 D6 शुश्रुवे हनुमान्वाचम् (for the prior half) Ñ2 D6 इति (for वाच) —(1 2) B2 वाप्त- (for चास्य) Ñ1 बभूव रामस्य मनो-, B4 बभूवास्य मनोत्साहो (for the prior half)]

27 B3 om 27 (cf v l 26) —[a]) D3 9 T1 G3 सन्निमित्तैश्च G3 damaged from र्थै up to महा in [b] Ñ2 V1 B1 2 4 D5 6 दृष्टार्थै Ś1 D10 स निश्चित्याथ ह(D10 ट्)-ष्टार्थ —[b]) B2 (*sup lin* also) D3 चारणैश्च (for कार°) D6 महागणै —[c]) D10 ऋषिवाक्य (for °क्यैश्च) —[a]) Ñ2 B2 D6 प्रीतिमान्पुन , B1 4 D1.3 7 9 T2 3 M1 प्रीति-मानस V पुनर्हृष्टतरोभवत्

28 B3 om 28 (cf v l 26) —[a]) G1 प्रीत- (for प्राप्त) Ñ2 V1 B1 2 4 D6 -पराक्रमार्थस्, V2 पराक्रमवान्वपुस् (for मनोरथार्थस्) —[b]) D3 अक्षिता (sic) Ś1 राजपुत्रीं, B4 °सभा (for °सुता) —[c]) T3 त्वा (sic) (for ताः) D3 5 10 प्रत्यक्षतसा(D3 °स्तत्) Ś1 Ñ1 D1 2 4 10 11 द्रष्टु (for दृष्ट्वा) Ñ2 V B1 2 4 D6 कार्याभियोगे वि (B2 °भि)निविष्टबुद्धि

Colophon —*Sarga name* Ś1 D1 10 हनुमच्चिन्ता, Ñ1 हनुमद्वचन ; Ñ2 V1 B2 D6 लंकादाहानुशय , V2 लंकादाह , B1 लंकादाहे सीतासंशय , B3 लांगूलप्रदीपन, B4 हनूमच्छोचना, D1 2 4 11 सीतानुशोचन —*Sarga no* (figures, words or both) Ñ1 B2 D1 2 4 10 11 om , Ś1 D5 7-9 T G M1 3 55 , Ñ2 V1 D6 53, V2 42, B1 51, B3 49, B4 56, D3 58, M2 54 —After colophon, D2 concludes with राम, G M1 2 with श्रीरामाय नम —After Sarga 53, Ñ2 V B1 2 4 D6 ins a passage relegated to App I (No 14), while B3 reads 5 52 1-14 (om 10-11[b]) and 16

५४

G 5 53 1
B 5 56 1
L 5 53 1

ततस्तु शिंशपामूले जानकी पर्यवस्थिताम् ।
अभिवाद्याब्रवीद्दिष्ट्या पश्यामि त्वामिहाक्षताम् ॥ १

ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः ।
भर्तृस्नेहान्वितं वाक्यं हनूमन्तमभाषत ॥ २

54

Before 1, D11 ins 1102*

1 a) D3 ता, D6 T2 G2 3 Cl. स (for तु) Ś1 D1 2 शि(Ś1 शि)शिपा, D3 शशपा, D5 -9 T2 3 शिंशुपा- (for शिंशपा-) D11 -मध्ये (for -मूले) —b) T1 3 G2 M3 पर्युप (for पर्यव-) D11 जानकी पर्युपस्थिता —c) Ś1 Ñ1 D1 2 4 5 10 दृष्ट्वा, D11 धृष्टो (for दिष्ट्या) D6 [आ]गता (for [अ]क्षताम्) Ś1 Ñ1 D1 4 10 11 दिष्ट्या पश्यामि चाक्षताम् & Ct इत आरभ्य 'पुनर्मध्येन सागरम्' इत्यन्ता सार्धचतुर्विंशतिश्लोका प्राग्व्याख्यातप्राया एव & —For 1, Ñ2 V B D6 subst., Ś1 Ñ1 D1-4 7 9 10 T2 ins only 1 1 before 9, D11 ins before 1.

1102* प्रवराञ्राक्षसान्हत्वा नाम विश्राव्य चात्मन ।
दग्ध्वा च नगरीं लङ्कां सीता द्रष्टुं ययौ कपि ।
गत्वा चामन्त्रयामास गमनाय महोदधे ।

[D11 repeats 1 1 (var) before 9 —(1 1) Ś1 Ñ1 D1-4 7 9 राक्षसाप्रवरान् (by transp), D10 राक्षसप्रवरान्, D11 (second time) स तत्र राक्षसान् —(1 2) B4 स दग्ध्वाथ पुरी लङ्कां, D11 दग्ध्वा च नगरी लङ्कां (for the prior half). —(1 3) D11 वां (for च) B2 मन्त्रयामास (for [आ]म°) Ñ2 B3 D6 कमणाय (for गमनाय)]

—After 1, D3 ins

1103* आत्मानं दर्शयित्वा तु तस्या स कपिकुञ्जर ।
सम्प्रहृष्टमना भूत्वा गमनाय मनो दधे ।

2 a) G3 स (for त) Ś1 Ñ1 D1-4 10 11 दृष्ट्वा (for सीता) Ñ2 V B D6 तम(B2 °द)भिप्रस्थि(B4 °स्तु [sic])त दृष्ट्वा —b) Ś1 V D3-10 वीक्ष्यमाणा, Ñ1 D1 2 11 वीक्ष्यमाण (for वीक्षमाणा) —c) D6 8 भर्तुं (for भर्तृ) D7 9 भर्तुं स्नेहान्विता वाक्य —For 2cd, Ś1 Ñ V B D1-4 6 10 11 subst

1104* भर्तृस्नेहादिदं वाक्य सौहार्दात्तमथाब्रवीत् ।

[D1 भर्तुं Ś1 Ñ1 D1 2 4 10 11 भर्तुं सुहृद, D3 भर्तुं सोहा° (for वाक्य सौहार्दत) D3 सुहृद वाक्यमब्रवीत् (for the post. half)]

—Then B4 cont

1105* स धु स धु महावीर यस्य ते वनमीदृशम् ।
दग्ध्वा लङ्कापुरीं सर्वां राक्षसो वधमेष्यति ।

—Then P4 further cont., while Ś1 Ñ V B1-3 D1-4 6 10 11 cont after 1104*, whereas D7 9 ins after 2

1106* यदि त्व मन्यसे तात वसैकाहमिहानघ ।
क्वचित्सुसंवृते देशे विश्रान्त श्वो गमिष्यसि ।
मम चैवात्पभाग्यायाः सान्निध्यात्तव वानर ।
शोकस्यास्याप्रमेयस्य मुहूर्तं स्यादपि क्षय ।
गते हि हरिशार्दूल पुनः सप्रासये त्वयि । [5]
प्रागेष्यपि न विश्वासो मम वानरपुंगव ।
अदर्शनं च ते वीर भूयो मां दारयिष्यति ।
दुःखाद्दुःखतरं प्राप्तां दुर्मनः शोककर्शिताम् ।
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः ।
सुमहत्सु सहायेषु हर्यृक्षेषु महाबल । [10]
कथं नु खलु दुष्पारं सतरिष्यन्ति सागरम् ।
तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ।
त्रयाणामेव भूतानां सागरस्यापि लङ्घने ।
शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ।
तदत्र कार्यनिर्बन्धे समुत्पन्ने दुरासदे । [15]
किं पश्यसि समाधानं त्वं हि कार्यविशारद ।

[(1 1) B1 यदीह, B3 D2 यदिदं (for यदि त्व). Ś1 Ñ1 D10 तावद् (for तात) Ñ V B1 2 4 D1 4 6 अरिंदम (for इहानघ) B3 वदाम्यहमरिंदम (for the post half) —(1 2) V B2 3 D6 त्व (for सु). D3 अभिक्ष्य संवृते देशे (for the prior half) D3 6 गमिष्यति —(1 3) D11 सानिध्य (for °ध्यात्) Ñ1 सानिध्यात्तु चराचरे (for the post half) —V2 om from the post. half of 1 4 up to the prior half of 1 5 —(1 4) V1 B1,3 4 D3 6 यदि (for अपि). B3 4 क्षम (for क्षय). —(1. 5) D2 शार्दूले Ś1 Ñ1 D2 10 11 मुहूर्तंगमने त्वयि, Ñ2 V1 B D6 मुहूर्तं गग(B1 4 °म)ने त्वयि, D3 पुनरागमनात्त्वयि (for the post half) —(1 6) Ñ1 D1 2 4 11 [इ]ह (for [अ]पि). Ñ2 V B D6 प्रागानामपि (for प्रागेष्यपि न) D3 प्राणानामपि सन्देहो (for the prior half) Ñ2 V B D6 मम न स्यादागम (for the post half) —(1 7) D10 मा (for मां). Ś1 Ñ V B D1-4 6 10 11 तापयिष्यति (for दार°). —(1 8) Ś1 V2 दुःख (for दुःखाद्) Ś1 D10 11 भूय, N1 भूयान्, Ñ2 V B D1 2 4 6 प्राप्य (for प्राप्ता). Ś1 प्रवासे, Ñ2 V B D6 दुःखितां, D10 प्रयास्ये (sic) (for दुर्मन-) N1 D2 दुर्मनस्कां सभागिनीं (for the post half) D3 दुःखे दुःखभूतां दुर्मनस्कामभागिनीं —(1 9) B1 3 सदेशस् (for सदेहस्). Ñ2 B2 4 D2 6 [इ]ह (for [इ]व) —(1 10) Ś1 Ñ V B1,3 4 D2 3 6 10 सुमहास्त्वत्(Ñ2 V D6 °स्तत्, B1 4 °स्त्व)सहायेषु, B3 सुमहांस्त्वयि नि क्षिप्तम् (for the prior half) V2 D3 7 9-11 हर्यक्षेपु (sic), B3 त प्रापय (for हर्यृक्षेपु) Ś1 D10 महात्मन D1 2 6 हर्यक्षेपु (sic) महाबल (for the post. half)

कामस्य त्वमेवैकः कार्यस्य परिसाधने ।
पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ ३
बलैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः ।
मां नयेद्यदि काकुत्स्थस्तस्य तत्सदृशं भवेत् ॥ ४
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः ।
भवत्याहवशूरस्य तत्त्वमेवोपपादय ॥ ५
तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् ।
निशम्य हनुमांस्तस्या वाक्यमुत्तरमब्रवीत् ॥ ६
क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः ।
यस्ते युधि विजित्यारीञ्शोकं व्यपनयिष्यति ॥ ७

G. 5. 53. 0
B 5 56 21
L 5 53 0

—(1 11) Ñ1 V2 B1–3 D2 4 6 11 तु खलु, B4 खलु सु- (for तु खलु) Ñ2 V D1–4 6,11 दु पार Ś1 Ñ1 D1 4 10 पारमे(D1 4 °पि)ष्यति सागर, Ñ2 V B1–3 D6 तरिष्यति महोदधिं(D6 °हार्णव), B4 पर तुष्यति सागर (sic), D2 3 11 तारयिष्य(D11 °ष्य)ति सागर (for the post half) —(1 12) B2 D1–4 6 7 9–11 हर्य(D4 °र्यु)क्ष (for हर्यृक्ष) Ñ1 चामर- (for वा नर) D1 4 वरोत्तमौ (for -वरात्मजौ) Ś1 D10 तौ चोभौ रामलक्ष्मणौ (for the post half) —(1 13) Ñ2 V B2 D3 4 6 11 अपि (for एव) Ś1 Ñ2 B1–3 D3 6 11 [अ]भि-, V पि, D1 2 4 7 9 [अ]ति-, D10 [अ]स्य (for [अ]पि) Ñ1 लघने सागरस्य हि (for the post. half) —(1 14) B4 D11 च (for second वा) —(1 15) Ñ2 V B1–3 D6 अस्मिन् (for अत्र) Ś1 D10 -निर्वेदे, Ñ1 B4 -सयोगे, D3 -निर्देशे, D11 -निर्विन्ने (sic) (for -निवन्धे) D1 4 काकुनिर्योगे (for कार्यनिर्बन्धे) Ñ2 V B D6 सुदारुणे (for दुरासदे) —(1 16) Ś1 पश्यामि (for पश्यसि) D2 कार्ये (for कार्य-) Ś1 D3 10 विदा वर (for -विशारद)]

3 =37 27 B3 om 3 —[a]) D3 अस्ति (for अस्य) —[c]) D1 5 6 11 परवीरघ्न —[d]) T3 Cr फलोदय, Cv m g k as in text (for वलो°) Ś1 Ñ1 D3 10 न त्वेतदुचित मम (Ñ1 महत्), Ñ2 B4 D6 नैतत्त्व(B4 °त्व)मिमत मम (D6 तव), B1 नैतत्त्वयि मत मम, B2 नान्यश्चेति मतिर्मम, D1 4 11 किंतु(D11 किमुत [hypm]) सर्वे सुमहता, D2 न त्वेह तु चिर मम (sic) —After 3, Ś1 Ñ V B D1–4 6 10 11 (Ś1 Ñ1 D1–4 10 11 1 1–2 after 4) ins

1107* बलै समग्रैर्यदि मा निहत्य रजनीचरान् ।
नयेत स्वपुर राम पर तत्स्याद्यशस्करम् ।
यथाह तस्य वीरस्य विरहे रुदती सती ।
हृता होतेन पापेन तथा नार्हति राघव· ।

[1 1–2 = 37 28 —(1 1) Ś1 Ñ1 D1 2 4 10 11 शरैस्तमेर्यदि मा युधि निर्जित्य रावण —D4 om 1 2–4 —(1 2) Ś1 Ñ1 विजित्य, B1 नयेच्च, D1–4 10 11 विजयी (for नयेत) Ñ2 B2 D6 स्वपुरीं Ś1 Ñ1 D1–3 10 11 नयेत्, Ñ2 तस्य (for पर) D2 तत्तद् (for तत्स्याद्). B2 तत्स्यात्तस्य यशस्कर, D6 रयनतस्यायशस्मत्कर (sic) (for the post half) —Ś1 Ñ1 D1–3 10 11 om 1 3–4 —(1 4) N2 V2 हृतेस्येतेन (sic) (for हृता होतेन) B3 तथा नाधर्मसहित (for the post half)]

4 =37 29. —[a]) D1 4 बाणैस्, D5,8 G2 M1 3 Cr m g शरैस्, Ck as in text (for वलैस्) —[b]) Ñ2 V B D6 -पुरजय, D11 -वलार्दिनीं (for वलार्दन) —[c]) D1 4 मा, D11 आ- (sic) (for मा) —[d]) Ś1 Ñ1 तदस्य, V B D1–5 7–11 S तत्तस्य (by transp) —After 4, Ś1 Ñ1 D1–4 10 11 ins 1 1 and 2 of 1107*

5 =37 30 B3 om 5, D4 om 5[ab] —[a]) D5 यद् (for तद्) —[b]) T2 अनुकूल (for °रूप) —[c]) G1 3 भवेद् (for भवति) —[d]) Ś1 Ñ V B1 2 4 D1–4 6–11 M3 तथा(B1 कथा) त्वमुपपा(M3 °सा)दय(Ś1 D10 °ये·)

6 =37 31 —[b]) V1 B1 2 4 D1–4 11 प्रसू(B1 °थि)त (for प्रश्रित) Ś1 -समित, V2 -सस्थित, D1–4 10 11 -सयु(D3 °म)त (for सहितम्) —[c]) Ñ2 V B D6–9 वीरो (for तस्या) —After 6, Ś1 Ñ V B D1–4 6 7 9–11 ins

1108* देवि हर्यृक्षसैन्यानामीश्वर प्लवता वर ।
सुग्रीव सत्त्वसम्पन्नस्तत्त्वार्थे कृतनिश्चय ।
स वानरसहस्राणा कोटीभिरभिसवृत ।

[1 1–2 = 37 32 and 1. 3 = 37 33[ab] D3 repeats 1 1 and 2 after 1 2 of 1111(A)* —(1 1) Ñ2 V B D6 वानर- (for हर्यृक्ष) Ś1 प्लवगेश्वर, Ñ2 V B D6 शत्रुनाशन (for प्लवता वर) D3(second time) अधिप प्लवगाधिप· (for the post half) —(1 2) D1 3(first time) 4 सत्य- (for सत्त्व-) —(1 3) B3 -सहस्राणि (sic) D1 4 11 कोटिभिर् V1 परिवारित (for अभिसवृत) Ś1 D10 कोटिकोटि-भिरावृत, B2 3 कोटिभि परिवारित (B3 °सवृत) (for the post half)]

—Thereafter, D7 9 cont 1109*.

7 [b]) D7–9 युत (for वृत) —For 7[ab], Ś1 Ñ V B D1–4 6 10 11 subst., while D7 9 cont after 1108*

1109* क्षिप्रमेष्यति वैदेहि सुग्रीव प्लवगाधिप ।

[The prior half = 37 33[c] Ñ2 V B D6 सुग्रीवो वैदेहि (by transp) D2 3 प्रियकृत्ते महाबल (for the post half)]

—Then Ñ2 V B D6 cont, D3 cont after 1 2 (r) of 1108*, D11 cont after 1 2 of 1111*

1110* तस्य विक्रमसम्पन्ना सत्त्ववन्तो महाबला ।
मन संकल्पसम्पन्ना निदेशे हरय स्थिता ।

G. 5. 53 29
B. 5. 56 22
L. 5. 53. 22

एवमाश्वास्य वैदेहीं हनूमान्मारुतात्मजः । गमनाय मतिं कृत्वा वैदेहीमभ्यवादयत् ॥ ८

येषा नोपरि नाधश्च न तिर्यक्सज्जते गतिः ।
न ते कर्मसु सीदन्ति मह स्वमितविक्रमाः ।
नैकशस्तैर्महाभागैः ससागरधराधराः । [5]
प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ।
मद्विशिष्टास्तथा तुल्याः सन्ति तत्र वनौकसः ।
मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसचिवो ।
अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ।
न हि प्रकृष्टान्प्रेष्यांश्च प्रेषयन्त्यवरावरान् । [10]
तदलं परितापेन देवि मन्युरपैतु ते ।
एकोत्पातेन ते लङ्कामेष्यन्ति हरिपुंगवाः ।
मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ ।
त्वत्सकाशं महाभागौ नृसिंहावागमिष्यतः ।

[1. 1 — 14 = 5 37 34-40 —(1 1) B3 ऋद्धिमतो (for सत्त्ववन्तो) D3 मनोमारुतरंहस (for the post half). —D3 om 1 2 —(1 2) D11 निवेशे (for निदेशे) D6 निदेशस्थस्य स्थिता (for the post half).—(1 3) V2 D3 नाधस्तान्, B3 धानश्च (meta) (for नाधश्च) Ñ2 B3 D6 तिर्यक्समज्जते गति (for the post half) —(1 4) D3 च (for ते) D3 तेजस (for -विक्रमा) —B3 om 1 5-7. —(1 5) V2 B2 D11 नैकशस्तै(B2 °शस्ते)र् (for °शस्तैर्). V1 महाभागे (for °भागे) B4 एकशतैर्महाभागै , D3 असमृत-मनोत्साहे (for the prior half) Ñ2 D11 -धराधरौ (for °धरा) —(1 6) D3 सर्वा (for भूमिर्) B4 स्वर्ग- (for वायु) —(1 7) B4 तथा त्वन्ये, D3 च तुल्याश्च (for तथा तुल्या) —(1 9) D11 प्राप्ता (sic) (for प्राप्त). D3 वनौकस (for महाबला) —B3 om 1 10 —(1 10) V1 ते, B1 तु (for च) D11 प्रेष्यस्तु (for प्रेष्यांश्च) Ñ2 [अ]महावरान्, B4 विपश्चित (for [अ]वरावरान्) V2 न ह्यत्र हृष्टान्प्रेष्यांस्ते प्रेषयति च वानरा , D3 न हि प्रकृष्टा प्रेष्यते ** प्रेत्य धराधरा —B1 transp 1 11-12 and 1 13-14 reading 1 13-14 in marg —(1 11) Ñ2 V उपैतु (for अपैतु) B4 देवि सोत्पातमुपैतु ते, D3 देवि मन्युरुपाश्यना (for the post. half) —(1 12) B4 एकोत्पातेन लङ्कायाम् (for the prior half). D3 -यूथपा (for -पुंगवा) —V2 om 1 14. —(1 14) B4 महाभागे, D3 अनघाभागि (hypm) (for महाभागौ)] —Thereafter Ñ2 V B D6 further cont , while Ś1 Ñ1 D1-4 7 8-11 cont after 1109*

1111* तौ च वीरौ नरवरौ सहितौ रामलक्ष्मणौ ।
आगम्य नगरीं लङ्कां सायकैर्विधमिष्यत ।
सगणं राक्षसं हत्वा नचिराद्रघुनन्दन ।
त्वामादाय वरारोहे स्वां पुरीं प्रतियास्यति ।
समाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी । [5]
क्षिप्रं द्रक्ष्यसि रामेण निहतं रावणं रणे ।
निहते राक्षसेन्द्रे च सपुत्रामात्यबान्धवे ।
त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ।

[1 1-8 = 5 37 41-44 B2 om (hapl) 1 1 and 2. —(1 1) V श्रेष्ठा (for वरौ). Ñ2 V B1 3 4 D6 भ्रातरौ (for सहितौ) —(1 2) Ś1 D10 11 आगत्य (for आगम्य) V2 च पुरीं (for नगरीं) B4 आगत्य लङ्कां तौ वीरौ (for the prior half). —After 1 2, D11 cont. 1110* —(1 3) D1 4 रणे (for -गण) Ñ2 V B D3 6 रावण (for राक्षस) Ñ2 V B D6 राघवो(B3 वानरो) वरवर्णिनि(B1-3 °नीं) (for the post half).—(1 4) D4 वरारोहा Ś1 त्व , B2 ता (for स्वां) B3 प्रतियास्यत , D2 3 अभियास्यति, D11 प्रतिगच्छति (for प्रतियास्यति) —B3 om 1 5 —(1 5) Ñ V B1 2 4 D1-4,6 तद् (for मम्-) D11 तदाश्वासय भद्रं ते (for the prior half). B4 देवि (for भद्र). —After 1 5, D3 cont. '

1111(A)* तानि दृष्ट्वाक्षसैन्यानि दानवोऽथ महाबलः ।
क्षिप्रं द्रक्ष्यसि कल्याणि लङ्काद्वारि स्थितानि तु ।
मा विषादं विशालाक्षि कुरु द्रक्ष्यसि राघवम् ।
लक्ष्मणं च धनुष्मन्तं लङ्काद्वारमुपस्थितम् ।
सुग्रीवं च महात्मानं वानरेन्द्रमरिंदमम् । [5]
अनेकांश्च महाकायान्हरीन्हरिणलोचने ।
नखदंष्ट्रायुधान्वीरान्गिरिशृङ्गविक्रमान् ।
वानरान्वानरेन्द्राभान्क्षिप्रं द्रक्ष्यसि संगतान् ।
कालाम्बुदनिकाशानां लङ्कामभ्यमानुषु ।
नर्दतां कपिसैन्यानां क्षिप्रं श्रोष्यसि निःस्वनम् । [10]
निहतं च दशग्रीवं रामबाणैः समर्पितैः ।
भिन्नदेहतनुत्राणं क्षिप्रं द्रक्ष्यसि भामिनि ।

[After 1 2, D3 repeats 1 1 and 2 of 1108* and then cont. 1110*.

—(1 6) Ñ1 V B1 D1 2 4 11 रावण निहत (by transp.). —(1 7) D2 3 तु (for च) B3 निहते रावणे चैव (for the prior half) Ś1 D10 -मित्र- (for -पुत्र). D11 -बान्धवे' —(1 8) Ñ2 D6 वीरेण (for रामेण). B4 सा त्वं यास्यति रामेण (for the prior half). —After the prior half of 1 8, D10 wrongly repeats the post half of 1 6 and the prior half of 1 7]

—Ś1 Ñ V B D1-4,6 10 11 om. 7^{cd} —^{c}) D5,7 9 T1 3 विनिर्जित्य (for विजित्यारीन्).

8 D6 repeats 8^{cd} after 9^{ab}. —^{d}) Ś1 Ñ2 V1 B D1 3 4 6(first time) 10 11 जानकीम् (for वैदेहीम्). D3 अभ्यभाषयत् —After 8, Ś1 D2 10 ins

1112* अमोघा निश्चला लक्ष्मीस्तथा जयपराजयौ ।
दृष्ट्वा हि सीता वैदेहीं श्रेयो मे गमनं तिव ।

[(1 1) D3 अमोघानि च युद्धानि, D10 अमोघानि त ** (for the prior half) —(1 2) D3 च (for हि) D3 वै (for मे)],

While D3 ins after 8 '

ततः स कपिशार्दूलः स्वामिसंदर्शनोत्सुकः ।
आरुरोह गिरिश्रेष्ठमरिष्टमरिमर्दनः ॥ ९

तुङ्गपद्मकजुष्टाभिर्नीलाभिर्वनराजिभिः ।
सालतालाश्वकर्णैश्च वंशैश्च बहुभिर्वृतम् ॥ १०

G. 5. 54. 3
B 5 56 34
L. 5 54 4

1113* हनूमता वाग्भिरदीनभाषिणा
मनोनुकूलाभिरभिप्रसादिता ।
हनूमतश्चाभिमुखी विदेहजा
मुदा कृतार्थेव बभूव वाबला ।

—Ś1 D2 10 after 1112*, D3 after 1113*, whereas Ñ V1 B D1 4 6 11 after 8, read an addl colophon

[*Sarga name* Ś1 D10 हनुमता सीताश्वासन, Ñ1 D2 सीताप्रत्याश्वासन, Ñ2 B1 2 4 D1 4 6 11 सीताश्वासन(D1 4 11 °न), V1 सीतासमाश्वासन, B3 जानक्याश्वासन, D3 सीतासमाश्वासने हनुमत्प्रस्थान —*Sarga no* (figures, words or both) Ñ1 D1-4 10 11 om, Ś1 Ñ2 V1 D6 55, B1 2 53, B3 51, B4 58, D3 59 —After colophon, D2 concludes with रम]

9 Before 9, Ś1 Ñ1 D1-4 7 9-11(D11 repeats cf v l 1) T2 ins only l 1 of 1102* and then cont, while Ñ2 V1 B D6 ins. before 9

1114* समाश्वास्य च वैदेहीं दर्शयित्वा पर बलम् ।
नगरीमाकुला कृत्वा वञ्चयित्वा च रावणम् ।
दर्शयित्वा बल घोर वैदेहीमभिवाद्य च ।
प्रत्यागन्तु मनश्चक्रे पुनर्मध्येन सागरम् ।

[Ś1 Ñ2 V1 B D6 om l. 1 D2 10 transp 1 1 and 2 —(l 1) D2 10 पुनर्दृष्ट्वा (for समाश्वास्य) Ñ1 D1 3 धा(Ñ1 वा)रयित्वा, D4 दर्शयिष्यति (hypm), T2 पातयित्वा (for दर्शयित्वा) D2 10 व्यथयित्वा च रावण, D11 भक्त्वा काननमुत्तम (for the post half) —(l. 2) Ñ1 व्याकुला Ñ2 V1 B D6 आकुला नगरीं (by transp) B D3 6 व्य(B3 क)धयित्वा (for वञ्च°) Ś1 D10 हत्वा च प्रवर बल, D2 वारयित्वा पुर बल (for the post half) —Ś1 om l 3 —(l 3) D2 मैथिलीम् (for वैदेहीम्) Ñ2 V1 B D6 अभिवाद्य(Ñ2 V1 D6 समाश्वास्य) च मैथिलीं (for the post half) —Ñ2 V1 B D6 om l 4 —(l 4) D7 9 प्रतिगतु D3 पुनश् (for मनश्). D3 कपिर् (for पुनर्) Ś1 मध्ये च (for मध्येन)], whereas D8 ins before 9

1115* प्रदक्षिण परिक्रम्य गगन चोत्पपात ह ।

V2 om 9-26, Ñ2 om 9^a —^{a}) B3 G2 च, G3 तु (for स). —^{b}) B3 स्वामिदर्शन उत्सुक, B4 स्वामिन (sic) दर्शनोत्सुक —After 9^{ab}, Dr repeats 8^{cd} —^{cd}) Ś1 N V1 B1 2 4 D2 10 11 गिरिं मुख्यम्, B3 गिरिं सह्यम् (for गिरिश्रेष्ठम्) D3 सुवेलम्, G1 हनूमान, Cv as in text (for अरिष्टम्) Ś1 Ñ V1 B D2 7 10 11 अरिं(Ñ1 B रिपु D10 निनि [sic], सूदन (for अरिमर्दन) D6 स तदा आरोह ह गिरिमुख्यमरिसूदन

10 V2 B3 om 10 (for V2, cf v l 9) —^{a}) Ñ1 D1-4 11 -पर्वत, Cv as in text (for -पद्मक-) Ś1 D10 शीतमारुतजुष्टाभिर्, T2 स तुगपद्मजुष्टाभिर् —After 10^{ab}, D3(ins only l 1 [followed by 1116(A)*] after 13) 5 7-9 S ins

1116* सोत्तरीयमिवाम्भोदै शुक्लान्नरविलम्बिभि ।
वोध्यमानमिव प्रीत्या दिवाकरकरै शुभै ।
उन्मिषन्तमिवोद्धूतैर्लोचनैरिव धातुभि ।
तोयौघनि स्वनैर्मन्द्रै प्राधीतमिव सर्वत ।
प्रगीतमिव विस्पष्ट नानाप्रस्रवणस्वनै । [5]
देवदारुभिरुद्भूतैरूर्ध्वबाहुमिव स्थितम् ।
प्रपातजलनिर्घोषै प्राकृष्टमिव सर्वत ।
वेपमानमिव श्यामै कम्पमानै शरद्वनै ।
वेणुभिर्मारुतोद्धूतै कूजन्तमिव कीचकै ।
नि श्वसन्तमिवामर्षाद्घोरैराशीविषोत्तमै । [10]
नीहारकृतगम्भीरैर्ध्यायन्तमिव गह्वरै ।
मेघपादनिभै पादै प्रक्रान्तमिव सर्वत ।
जृम्भमाणमिवाकाशे शिखरैरभ्रमालिभि ।
कूटैश्च बहुधाकीर्ण शोभित बहुकन्दरै ।

[After l 1, D3 ins

1116(A)* परिधानमिवाधस्तान्नानातरुलतावृतम् ।

—(l 2) T1 2 G1 3 M1 Cr सुखे, Cg as above (for शुभै°). —(l 3) D8 [उ]द्भूतैर् (for [उ]द्धूतैर्) D3 नयनैर् (for लोचनैर्) —(l 4) D6 G M निस्वनैर् D6 G3 M2 मन्त्रै, Cv g as above (for मन्द्रै) D3 तोयोपलस्वनैर्मन्द्रै (for the prior half) D3 5 9 T2 प्रधी(D3 °गी)तम्, Cr m g k t as above (for प्राधीतम्) T2 सवश, G2 M3 पर्वत (for सर्वत) —D3 transp l 5 and 6 —(l 5) D8 सम्पृष्ट, G2 M3 विस्प(M3 °स्पृ)ष्टैर् (for विस्पष्ट) D3 वाध्यतमिव विस्फोटैर्, T1 प्रागीतमिव सुस्पष्ट (for the prior half). —After l. 5, D3 ins

1116(B)* आगच्छन्तमिवाम्भोदै रत्नशैलैश्चलाचलै ।
विस्तीर्णोपलजिह्वाग्र द्विजिह्वमिव पन्नगम् ।

—(l 6) T G2 3 M1 3 अत्युच्चैर् (for उद्भूतैर्). —After l 6, D3 ins

1116(C)* प्रस्रवणजलप्रपातैर्वर्षन्तमिव सर्वत । (hypm)

—D3 transp l 7 and 8 —(l 7) T2 प्रपतज्, Cv as above (for प्रपात-) D3 प्रपानजलनिस्फोटै (for the prior half) D3 प्रोत्सृष्टम्, M1 प्राधृष्ट्, Cr m g k t as above (for प्राकृष्टम्) T2 सर्वश, G2 पवन (for सर्वत). —After l. 7, D3 ins

1116(D)* आलिखन्तमिवाक्ष्यो-र्यैर्गण्डशैले शिलाचलै ।
विकीर्णकरबाहूरु सशरीरमिवाचलम् ।

Vyas Research Team

G. 5. 54 4
B. 5. 56 34
L. 5. 54. 5

लतावितानैर्विततैः पुष्पवद्भिरलंकृतम् ।
नानामृगगणाकीर्णं धातुनिष्यन्दभूषितम् ॥ ११

बहुप्रस्रवणोपेतं शिलासंचयसंकटम् ।
महर्षियक्षगन्धर्वकिंनरोरगसेवितम् ॥ १२

लतापादपसंबाध सिंहाकुलितकन्दरम् ।
व्याघ्रसंघसमाकीर्णं स्वादुमूलफलद्रुमम् ॥ १३

तमारुरोहातिबलः पर्वतं प्लवगोत्तमः ।
रामदर्शनशीघ्रेण प्रहर्षेणाभिचोदितः ॥ १४

तेन पादतलाक्रान्ता रम्येषु गिरिसानुषु ।
सघोषाः समशीर्यन्त शिलाश्चूर्णीकृतास्ततः ॥ १५

—(1 8) G1 रुपमानम् D5 T1 3 G1 3 M1 शरद्धनं D3 स्कधमात्रं शिलोच्चय (for the post. half) M3 वेपमानमिवाकाशे शिखररश्रमालिभि ❀ Cv शरद्धन, शरद्वानिति यथा कृपाचार्यजनकस्य शरस्तम्बजात श्रुत्वा हेतोस्तन्नामवन्तीति।, Cr k शरद्धनै (Ck इति पाठ)। शिखरलीनैरिति शेष।, Cm t शरद्धनै सप्तपर्णादिशारदवृक्षसघै।, Cg शरदि ये घना भवन्ति ते शरद्धना। शरत्कालपुष्पित सप्तच्छदाद्ययस्तैं शुभ्रीभूतैजगद्या कम्पमानमिव स्थितमित्यर्थ। शरद्धनैरिति पाठे बहुवापिकवृक्षरित्यर्थ। शरवणैरिति वार्थ। तकारात्तोऽप्यस्ति। शरवणे जातस्य कृपाचार्यस्य शारद्वत इति नामदर्शनात् ❀ —M2 om 1 9–14 —(1 9) D5 reads मिव कीचके in marg —(1 10) D7–9 T3 G M1 3 निश्वसतम् D3 -[उ]च्छ्वसै, D5 8 G -[उ]पम, T2 -[अ]निलं, Cg as above (for -[उ]त्तम) —(1. 11) T2 -[आ]वृत-, G2 -[आ]वृत्ति, G3 वृत्त-, Cv as above (for -कृत-) D3 नीहारमिव गभीरं (for the prior half) D5 कदरै (for गह्वरं) —(1 12) D3 -राजि-, D5 -पान, T2 M1 -जाल-, Cv as above (for -पाद-) G1 मेघघातनिभैर्वातै (for the prior half) D3 प्रक्रुष्टम् (for प्रक्रान्तम्) G1 M3 पर्वतम् (for सर्वत) —T1 illeg for 1 13 —(1 13) T3 -जालिभि, G3 Cr k -शालिभि, Cm g t as above (for -मालिभि) —After 1 13, D3 ins

1116(E)* गुहान्तरगतै सिंहैर्गजैश्चान्तमिव धिष्ठितै ।
लतागृहसमाकीर्णं कुसुमैर्बहुभिरावृतम् ।

—(1. 14) D5 M3 Cg [आ]कीर्ण, Ck as above (for °र्ण). D3 निकुजविविधाकार (for the prior half) D8 -कुजैर (for कन्दरं) —After 1 14, D3 ins

1116(F)* बहुभूनेकमारेश्च चन्दनश्च समावृतम् ।]

—e) B1 D1–4 6 शाल- (for माल) D 0 11 -तालैश् (for ताल-) V1 D5 7 9–11 च (for -[अ]श्व-) Ñ1 सालतालाश्च कर्णश्च —d) Ś1 D1 2 4 10 11 वन्यैश्; Ñ V1 B1 2 4 D6 द्रुमैश् (for वशैश्) M1 विविधैर् (for बहुभिर्)

11 V2 om 11 (cf v l 9). —a) Ś1 Ñ1 D10 11 बहुभि, Ñ2 V1 B D1–4 6 विविधै, D5 वितत (for वितते) —B1 om (hapl) 11d–13c, D8 om (hapl ?) 11cd G1 M1 transp 11d and 13d —d) B1 D1 4 9 -निस्यद्-, D3 -निस्पद्-, D6 7 -निष्पद्-, D11 -विस्फद्-, M1 -विष्यद्-, Cr m g t as in text (for -निष्यन्द्-) Ś1 Ñ D5 10 -शोभित (for -भूषितम्) V1 sa 3 स्यदनभूषित, B2 3 धातुवृदविभूषित, T2 स्वादुमूलफलद्रुम(=13d) ❀ Cv धातुविष्यन्दभूषितमिति पाठ ❀

12 V2 B4 om. 12 (cf v l 9 and 11). —b) Ñ2 D6 M3 -सकुल, M2 कटम्, Cm t as in text (for सकटम्) Ś1 शिलाभिश्च सुसकट —d) D5 -भूषित (for सेवितम्)

13 V2 om 13, B4 om 13abc (cf v l 9 and 11), B3 om 13ab —a) B2 नाना- (for लता) D8 M3 Cg सघातं, D10 -सघाद, D11 -सघाध (sic), Ct as in text (for -सघात) —b) Ñ2 V1 B1 -[आ]कुलित- (sic), D5 7–9 T2 -[अ]धिष्ठित-, T1 3 M3 -[अ]ध्युषित-, G1 M1 2 -[आ]लुलित-, G2 3 -[आ]लोलित- (for -[आ]कुलित-). Ś1 D10 11 सिद्ध(Ś1 मुनि)सेवितकदरं, D1 4 सिंहम्ह(D1 °ह)तकदर —c) Ś1 Ñ V1 B2 3 D6 10 -सिह-, D1 -द्वीपि; D2–4 -द्विप-, G2 -सघै. (for -सघ-) B1 सिहव्याघ्र, D5 7–9 T2 व्याघ्रादिभि· (for व्याघ्रसघ-) D11 व्याघ्रसिंहसमायुक्त. —G1 M1 transp 11d and 13d —d) D2 चारु (for स्वादु-) T1 3 G2 3 -फलोदक (for फलद्रुमम्) D8 धातुनिष्पदभूषित —After 13, D3 ins only 1 1 (followed by 1116(A)*) of 1116*

14 V2 om 14 (cf v l 9). —a) Ś1 D3,10 सम्(for तम्) B2 3 विपुल, D1 4 [अ]तिबल, T1 3 G2 M3 हनुमान् (for [अ]तिबल) D5 7–9 T2 G1 3 M1 3 आरुरोहानिलसुत. —b) D1 4 वानरोत्तम; T1 3 G2 M3 पवनात्मज (for प्लवगोत्तम). —c) G2 -शैघ्रेण, Cr m t as in text (for -शीघ्रेण). D11 रामदर्शनमाशाय —d) V1 B1–3 D2 11 प्रचो(V1 °नो, D11 °मो)दित, D6 च चोदित· (for [अ]भिचोदित) Ś1 B4 D10 म हर्षेण(B4 हर्षेण च) प्रचोदित·, Ñ1 स हर्षेणाथ देशित, D1 4 पौरुषेण प्रणोदित; D3 5 M2 हर्षेणा(D3 मनसा)भिप्रचोदित.

15 V2 om 15 (cf v l 9). —a) D2 कपि (for तेन) Ñ2 G1 2 M2 -क्राता, B2 -क्षिप्ता (for -[आ]क्रान्ता). —b) D4 रमणीयेषु(hypm) (for रम्येषु) —cd) Ñ B D6 सनिनादम् (for सघोषा सम्-) M1 समकीर्यत Ś1 D1 2 4 10 11 सघोषमव(Ś1 D10 °+ग)शीर्यत (for °) Ś1 धूली, B2 D6 चूर्णा (for चूर्णी-). D1 2 4 G2 M1 तदा D5 11 तथा, Ck as in text (for तत) D3 सघोषमिव शीर्यत शिलाश्चोपलसकटा

स तमारुह्य शैलेन्द्रं व्यवर्धत महाकपिः ।
दक्षिणादुत्तरं पारं प्रार्थयँल्लवणाम्भसः ॥ १६

अधिरुह्य ततो वीरः पर्वतं पवनात्मजः ।
ददर्श सागरं भीमं मीनोरगनिषेवितम् ॥ १७

स मारुत इवाकाशं मारुतस्यात्मसंभवः ।
प्रपेदे हरिशार्दूलो दक्षिणादुत्तरां दिशम् ॥ १८

स तदा पीडितस्तेन कपिना पर्वतोत्तमः ।
ररास सह तैर्भूतैः प्राविशद्वसुधातलम् ।
कम्पमानैश्च शिखरैः पतद्भिरपि च द्रुमैः ॥ १९

तस्योरुवेगोन्मथिताः पादपाः पुष्पशालिनः ।
निपेतुर्भूतले रुग्णाः शक्रायुधहता इव ॥ २०

कन्दरोदरसंस्थानां पीडितानां महौजसाम् ।
सिंहानां निनदो भीमो नभो भिन्दन्स शुश्रुवे ॥ २१

स्रस्तव्याविद्धवसना व्याकुलीकृतभूषणा ।
विद्याधर्यः समुत्पेतुः सहसा धरणीधरात् ॥ २२

अतिप्रमाणा बलिनो दीप्तजिह्वा महाविषाः ।
निपीडितशिरोग्रीवा व्यवेष्टन्त महाहयः ॥ २३

G 5. 54 17
B 5 50 47
L. 5 54 19

---

16 V2 om 16 (cf v l 9) —^{c}) N2 B4 D2 3 6 तीर (for पार) —^{d}) Ś1 D10 पर्यटँल्ल, Ñ1 समीक्ष्य, Ñ2 V1 B D3 6 गमिष्यँन् (for प्रार्थयँल्ल) D2 11 लवणाभसि

17 V2 om 17 (cf v l 9) —^{a}) B3 अभि-, D11 अव (for अधि-) —^{c}) Ñ V1 B D6 घोर (for भीम) —^{d}) B1 D4 7 9 भीम-, D3 महा- (for मीन-) Ñ1 विभूषित (for निषेवितम्) D2 भीमनक्रनिषेवित

18 V2 om 18 (cf v l 9) —^{a}) Ś1 Ñ V1 B D1 2 4 6 10 11 [आ]काशे —^{b}) Ś1 Ñ V1 B D1–4 6 10 11 [औ]रस सुत (for [आ]त्मसंभव). —^{d}) Ś1 Ñ V1 B D1–4 6 10 11 पितु पथानमुत्तम

19 V2 om 19 (cf v l 9) —^{a}) Ś1 D1 4 10 11 M1 स तया, Ñ V1 B2 3 D2 6 तत स, B1 4 D3 तत (B4 °त्र) स (for स तदा) —^{cd}) D4 रराज, D11 चचाल (for ररास) Ñ V1 B2–4 D3 6 सहितै (Ñ1 °त) सर्वै (B2 D3 °र्वै), B1 D2 सह तै· सर्वै (D2 °र्वै), D1 4 सवृतो वृक्षै, D7–9 T2 G3 M2 विविधैर्भूतै, D11 सवृतैर्वृक्ष, Cg as in text (for सह तैर्भूतै) Ñ2 V1 B1 2 D1 4 6 8 G3 M3 प्र(M3 प्रा)विशन्(B1 °द्), D11 प्रविष्टश् (for प्राविशद्) Ñ1 D1 2 4 11 च महीतल (for वसुधा°) D3 विशतिव महीतल (for ^{d}) Ś1 D10 सर्वैश्च सहित सत्त्वै प्रविवेश महीतल —B3 om 19$^{e/}$ —^{f}) G3 इव (for अपि) Ś1 Ñ1 D1 2 4 10 11 पतद्भिश्चाचलोप(Ś1 Ñ1 D11 °त्त)मैं, Ñ2 B1 2 4 D6 प्र(B2 नि)पतद्भिस्तथापरै, V1 [illegible] नद्भमैं (illeg), D3 पतद्भिश्च तथापरै —After 19, Ś1 Ñ V1 B1 2 4 D1–4 6 10 11 ins

1117* स गिरि क्षोभितस्तेन प्रनृत्त इव लक्ष्यते ।

[B4 प्रनृत्य (sic), D1 4 प्रनृत्यन्, D3 10 11 प्रवृत्त (for प्रनृत्त) Ś1 D10 दृश्यते, B1 लक्ष्ये(sic) (for लक्ष्यते)]

20 V2 om 20 (cf v l 9) —^{a}) B D6 -वेगान् (for वेग) Ñ D6 -मथिता (for -[उ]न्म°) Ś1 D10 तस्योरुवेगमाश्रित्य —^{b}) Ś1 D3 10 शोभिन, Ñ V1 B D1 2 4 6 11 -शोभिता (for -शालिन) —^{c}) Ś1 Ñ V1 B D1–4 6–11 भग्ना· (for रुग्णा) —^{d}) Ś1 Ñ V1 B D1–4 6 10 11 शक्रास्त्र-(Ś1 °स्रा), G2 शक्राशनि-, Cg t as in text (for शक्रायुध-)

21 V2 om 21 (cf v l 9) Ñ1 om 21^{ab} —^{a}) Ś1 Ñ2 V1 B1 2 4 D1–4 10 11 T1 3 M3 -[अं]तर- (for -[उ]दर-) B3 D6 कन्दरान्तरसक्ता(D6 °सस्था)ना —^{b}) Ś1 D1 2 4 10 11 महात्मना (for महौजसाम्) —^{c}) Ñ V1 B D1 4 6 11 घोरो (for भीमो) D3 महास्तु निनदो भूयो —^{d}) D7–9 हि, T2 G2 प्र- (for स) Ś1 Ñ V1 B D1–4 6 10 11 G1 मेघानामिव शुश्रुवे

22 V2 om 22 (cf v l 9) —^{a}) D7–9 Ct त्रस्त-, M1 हस्त-, Cr g k as in text (for स्रस्त-) Ś1 D10 11 -प्रवृद्ध-, B2 D6 व्याकृष्ट-, D1 4 प्रविद्ध, M3 व्यावृत्त-, Cr m g t as in text (for -व्याविद्ध-) Ñ V1 B1 3 स्र(Ñ1 त्र)स्तव्याकृ(B1 °ह)ष्टवसना, B4 त्रस्तविक्षिप्तवसना, D2 स्रस्तप्रवृद्धरशना, T1 3 G2 स्रस्तव्यावृत्त(G2 °विद्ध)-रशना ❀ Cm t (Cm त्रस्तव्याविद्धवसना इति पाठ।) त्रस्तेन त्रासेन(Ct त्रस्ता·, अत एव) व्याविद्धानि व्यत्यस्तानि वसनानि यासा ता ❀ —^{b}) D10 -भूषिण (sic) (for -भूषणा) —After 22^{ab}, D1 reads 24 —^{c}) Ś1 D10 प्रपेतुश्चागनाश्चस्ता, Ñ2 V1 B D2 स(D2 स)मुत्पेतुर (D2 °श्चा)प्सरस, D1 4 पेतुश्चाप्सरसश्चस्ता, D11 प्रपेतु-श्चामराश्चस्ता —^{d}) Ñ1 B1 4 D10 -तलात्(D10 °ले) (for -धरात्)

23 V2 om 23 (cf v l 9) Ś1 Ñ V1 B D2–4 6 10 11 transp 23 and 24 (including 1118*) —^{a}) D1 4 प्रति- (for अति-) D1 G1 M1 प्रमाण (for -प्रमाणा) Ñ V1 B1–3 D6 बहवो, M2 विपुलो (for बलिनो) B4 अप्रमाणाश्च बहवो —^{b}) D1 4 दीर्घजघा, D3 G2 M2 दीर्घजिह्वा (for दीप्तजिह्वा) —^{c}) D8 नि पीडित- B4 -भुज- (for -शिरो) —^{d}) G2 व्यावेष्टत Ś1 D10 T2 G महोरगा, T1 गुहाशया (for महाहय) Ñ V1 B D6 व्यचेष्ट(Ñ1

Arya Research Team

G. 5 54 16
B 5 56 48
L. 5 54 18

किंनरोरगगन्धर्वयक्षविद्याधरास्तथा ।
पीडितं तं नगवरं त्यक्त्वा गगनमास्थिताः ॥ २४
स च भूमिधरः श्रीमान्वलिना तेन पीडितः ।
सवृक्षशिखरोदग्रः प्रविवेश रसातलम् ॥ २५
दशयोजनविस्तारस्त्रिंशद्योजनमुच्छ्रितः ।
धरण्यां समतां यातः स बभूव धराधरः ॥ २६

इति श्रीरामायणे सुन्दरकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

Arya Research Team

°चर)त भुजगमा , D1-4 8 व्य(D2 वि[sic])चेष्टत महोरगा , D11 निविष्टातमहोरगा . ❀ Cm t व्यचेष्टन्त कुण्डलीकृतशरीरा अजायन्त । व्यचेष्टन्तेति पाठे पीडया अलुण्ठदित्यर्थ . ❀ —After 23, Ś1 Ñ V1 B D1-4 6 10 11 ins

